कार्तिकमासः
वर्षम् – ६९
प्रथमोऽङ्कः
विक्रमाब्दः २०७५
युगाब्दः ५१२०
५ नवम्बर २०१८

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–



भारती संस्कृत-मासपत्रिका

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | श्रीकृष्णमन्त्रमहास्तोत्रम् | आचार्य पं. नथमलशास्त्री दाधीचः | ९ |
| ५ | लक्ष्मीलीलाविलास-रथोत्सवः | पं. श्रीकृष्णलालशुक्लः | १० |
| ६ | नूतनकाव्यपृषताः | डॉ. हर्षदेवमाधवः | ११ |
| ७ | भारतराष्ट्रपरिचयः | डॉ. सुरेन्द्रकुमारशर्मा | १२ |
| ८ | पुस्तकसमीक्षाः | म.म. देवर्षिकलानाथशास्त्री | १४ |
| ९ | सूक्ति-सुधा | डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्यः | १७ |
| १० | श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने- | वेणीमाधव गो. धर्माधिकारी | १८ |
| ११ | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | १९ |
| १२ | भारतभूम्याः विभूतयः | अविनाश शर्मा | २० |
| १३ | अव्ययीभावस्थपङ्क्तिविमर्शः | कृष्णदेवशुक्लः | २२ |
| १४ | ऋग्वेदीयं कल्पसाहित्यम्, तत्परिचयश्च | दीपिका गौतम | २७ |
| १५ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | २९ |
| १६ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३१ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाषः 0141-2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें- प्रबन्ध सम्पादक)**



।। श्रीशः ।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका



**प्रमुखसंरक्षकाः**

जगद्गुरवो निम्बार्कपीठाचार्याः स्व. श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**

स्व. जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

आर्थिकपरामर्शदाता
ओ.पी. गोयलः

पृष्ठसंयोजनम्
श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

अञ्जन्यां पवनेन यो जनिमितः पक्षेऽसिते कार्तिके,
विद्याबुद्धिनिधिप्रदश्च बलदः सिद्धिप्रदः कामदः।
मत्वा यश्च रविं फलं सुमधुरं योऽभक्षयद्धेलया,
रामाज्ञापरिपालकं कपिवरं वन्दामहे तं वयम्।।

## मासावतरणम्

माहात्म्यं ननु कार्तिकस्य बलिना वर्धापितो जन्मना,
श्रीकृष्णः स्वकरे दधौ गिरिवरं गोवर्द्धनं कार्तिके।
देवा जागरिता बभूवुरचिरं मासे शुभे कार्तिके,
दानस्याक्षयमाप्नुवन्ति सुफलं मासे शुभे बाहुले।।


कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

कार्तिकमासः
वर्षम् 69
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2075
नवम्बर, 2018
अङ्कः -1
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

सम्पादकीयम्

# नूतनवर्षारम्भः

...✍ पं. प्यारेमोहनशर्मा

हर्षस्यायं विषयो यत् भारतीसंस्कृतपत्रिका दीपावलिपर्वणि ऊनसप्ततितमे वर्षे प्रवेक्ष्यति। संस्कृत-रक्षायै राजस्थानीयाः संस्कृतविद्वांसः स्वतन्त्रता-प्राप्त्यनन्तरं सततं प्रायतन्त। सर्वतः प्रथमं संस्कृतरत्नाकरः जयपुरात् प्राकाश्यमुपगतः। म.म.पं. गिरिधरशर्मचतुर्वेदाः कविशिरोमणयो भट्टमथुरानाथशास्त्रिणः पं. सूर्यनारायण-शास्त्रिणश्च मिलित्वा स्वीयधनेन संस्कृतरत्नाकरं प्राकाशिषत। विंशतिवर्षाणि यावत् संस्कृतरत्नाकरः जयपुरात् प्राकाश्यमुपगतः ततः पत्रमिदं वाराणसीतः प्राकाशिष्ट।

संस्कृतमासपत्रिका भारती पञ्चाशदधिकैकोन-विंशति शततमे ख्रिष्टाब्दे दीपावलिपर्वतः प्रकाशिताभवत्। राष्ट्रीयस्वयंसेवकसंघस्य प्रचारका दादाभाईगिरिराज-शास्त्रिणो बाबासाहब आप्टेमहोदयानां प्रेरणया पत्रिकायाः प्रबन्धसम्पादकपदमलञ्चक्रुः। पत्रिकेयं ततः प्रभृति निर्बाधरूपेण समये प्रकाशिता भवति। संस्कृतपत्रिकासु दीर्घायुष्यं पत्रिकयानयैव प्राप्तम्। भारतीपरिवारः अस्मिन्नवसरे दिवंगतेभ्यो दादाभाईमहोदयेभ्यः सश्रद्धं स्मरणपुष्पाञ्जलिं समर्पयति।

अस्मिन्नवसरे पूर्वसम्पादकानपि वयं स्मरामः। अस्याः प्रथमसम्पादकाः विलक्षणविचक्षणाः विद्वासः श्रीसुरजनदासस्वामिनः आसन्। जोधपुरविश्वविद्यालये महानुभावा इमे संस्कृतविषयस्य विभागाध्यक्षपदमलञ्चक्रुः। एते सम्पादनकर्मकुशला अविद्यन्त। दिवंगतेभ्यः स्वामिमहाभागेभ्यः सविनयं श्रद्धाञ्जलिं समर्पयति भारतीपरिवारः।

महाराजसंस्कृतमहाविद्यालये धर्मशास्त्रविभागाध्यक्षा धर्मशास्त्राचार्याः पं. वृद्धिचन्द्रशास्त्रिणोऽपि किञ्चित् कालं यावत् पत्रिकां समपीपदन्। एते धर्मशास्त्रस्य धुरन्धरा विद्वास आसन्। भारतीपरिवारः अस्मिन् नववर्षप्रवेशावसरे श्रीमद्भ्यः सादरं श्रद्धाञ्जलिं समर्पयति।

तदनन्तरं भारतप्रसिद्धाः कविशिरोमणयो भट्टश्री-मथुरानाथशास्त्रिणः सम्पादकपदमलञ्चक्रुः। इमे संस्कृतकाव्यरचनायां नवाचारं प्रारभन्त। दोहा, चौपाई, छप्पय प्रभृति छन्दसु संस्कृते काव्यमरीरचन्। एतेषां रचनाधर्मितामवलोक्य प्रसिद्धः संस्कृतेतिहासलेखको बलदेवोपाध्यायः संस्कृतस्य वर्तमानकालं मथुरानाथ-कालमजूघुषत्। पत्रिकायै समये लेखाः प्राप्ता भवेयुरेतदर्थं भारत्यां स्तम्भलेखानां परम्परामरचयन्। नववर्ष प्रवेशावसरे भारतीपरिवारः सादरं भवन्तं स्मरति श्रृद्धाञ्जलिं च समर्पयति।

ततः आशुकवयः श्रीहरिशास्त्रिणः पत्रिकायाः सम्पादकपदमशोभयन्त। इमे साहित्यशास्त्रस्य विलक्षणा विद्वांस आसन्। हिन्द्यामपि एते काव्यमरीरचन्। इमे वाममार्गतः भगवतीं दुर्गामुपासिषन्त। तन्त्रशास्त्रेऽपि श्रीमतामद् भुताधिकारोऽवर्तिषत। वाराणस्यां समायोजिते अखिलभारतीयतान्त्रिकसम्मेलने श्रीमन्तोऽध्यक्षपद-मलञ्चक्रुः। भगवत्याः स्तुतिसम्बद्धानि नैकानि स्तोत्राणि भवन्तोऽसृजन्। भारतीपरिवारः तान्त्रिकेभ्यो भगवती-समुपासकेभ्यो भवद्भयो नववर्षप्रवेशावसरे सविनयं श्रद्धाञ्जलिं समर्पयति।

ततो दीनानाथशास्त्रिणो मधुपोपाह्वाः न्यायशास्त्रा-चार्याः साहित्यशास्त्रिणः काव्यरचनाकुशलाः भारती-

पत्रिकायाः सम्पादकपदमलञ्चक्रुः। संस्कृतमहाविद्यालये व्याख्यातृपदात् सेवानिवृत्तेभ्यः श्रीदीनानाथशास्त्रिभ्यः भारतीपरिवारः सादरं श्रद्धाञ्जलिं समर्पयति।

ततश्चास्मद्गुरवः श्रीमन्तो जगदीशाचार्याः सम्पादकपदमलञ्चक्रुः। एते साहित्यशास्त्रस्य विलक्षणा विद्वांसोऽवर्तिषत। एभिः सुप्रसिद्धेभ्यः विद्वद्वरेभ्यः श्रीवीरेश्वरशास्त्रिभ्यः व्याकरणन्यायमीमांसादीनि नाना शास्त्राण्यधीतानि। जयपुरीयमहाराजसंस्कृत-महाविद्यालये एते चिरं साहित्यविभागाध्यक्षपदमल-ञ्चक्रुः। भवतां शिष्याः अधुना विभिन्नेषु प्रतिष्ठितपदेषुः समासीना वर्तन्ते। विद्वांसो भवन्तं संस्कृतस्य चलायामानाः शब्दकोषा अजूघुषन्। भवतां शिष्येषु भारत्याः प्रधानसम्पादका महामहोपाध्यायाः देवर्षि-कलानाथशास्त्रिणः रामानन्दसंस्कृतविश्वविद्यालयस्य शास्त्रीयपीठाधीशपदात् सेवानिवृत्ताः श्रीमन्त अनन्त-शास्त्रिणो भारते संस्कृतविदुषामग्रगण्या वर्तन्ते। संस्कृत-महाविद्यालयात् सेवानिवृत्त्यान्तरं श्रीजगदीशशास्त्रिणो वनस्थलीविद्यापीठे विंशति वर्षाणि यावत् मानदाचार्य-रूपेण छात्राभ्यः संस्कृतमपाठिषुः। अस्मिन् नववर्ष-प्रवेशावसरे पण्डितवर्येभ्यो भवद्भ्यो भारतीपरिवारः सश्रद्धं श्रद्धाञ्जलिं समर्पयाति।

श्रीजगदीशाचार्याणां सहयोगिरूपेण श्रीरामगोपाल-धर्मशास्त्रिणो भारत्याः सहसम्पादका अभूवन्। इमे शब्दशास्त्रस्य धर्मशास्त्रस्य चाधिकारिणो विद्वांस आसन्। भारत्या अक्षरशोधनकार्यमपि भवन्तः अकुर्वन्। भवतां शोधकार्यानन्तरं नैकाप्यशुद्धिः पत्रिकालेखेषु दृष्टि-पथमायातिस्म। अस्मिन्नवसरे वयं श्रीमद्भ्यः सादरं श्रद्धाञ्जलिं समर्पयामः।

तदनन्तरं दादाभाईमहोदया मह्यमादिशन् यद् भवन्तः सम्पादककार्यं कुर्वन्तु। यद्यपि न मया इतः पूर्वं कस्या अपि पत्रिकायाः सम्पादनं विहितम्। मदीयं संकोचं विलोक्य दादाभाईमहोदया अवदन्-भवन्तः सम्पादकपदं स्वीकुर्वन्तु। भवतां मार्गदर्शनाय श्रीदेवर्षिकलानाथ-शास्त्रिणः प्रधानसम्पादकाः भविष्यन्ति। अहमधुनैव श्रीकलानाशास्त्रिणे निवेदयिष्यामि प्रधानसम्पादकपदं स्वीकर्तुम्। ततश्च मया दादाभाईमहोदयानामाज्ञया भारत्याः सम्पादकपदमङ्गीकृतम्। प्रारम्भे गुरवः श्रीजगदीशशास्त्रिणः समये समये मार्गदर्शनमकुर्वन् महामहोपाध्यायाः देवर्षिकलानाथशास्त्रिणोऽपि समये समये निरदिशन्। अस्तु अस्मिन्नवसरे अहं सर्वेभ्यः प्रणमामि। भारत्याः प्रबन्धसम्पादकेभ्योऽपि कृतज्ञतां विज्ञापयामि।

भारत्याः प्रधानसम्पादका महामहोपाध्यायाः देवर्षिकलानाथशास्त्रिणः भारतप्रसिद्धाः विद्वांसः सन्ति। भवतां नाम्नैव संस्कृते सर्वत्र विद्वांसः पत्रिकां भारतीं श्रेष्ठां मार्गदर्शिकां च आमनन्ति। नैके विश्वविद्यालयस्य कुलपतयोऽपि भवन्तं प्रधानं दृष्ट्वा सादरं स्वकीयान् लेखान् भारत्यां प्रकाशनाय प्रेषयन्ति।

महामहोपाध्यायाः देवर्षिकलानाथशास्त्रिणोऽष्टा-दशभाषावारविलासिनीभुजङ्गा वर्तन्ते। अष्टादशसु भाषासु भवन्तो वक्तुं शक्नुवन्ति। लिखितुं च समर्थाः सन्ति। भवतां सहस्रशः पत्राणि आकाशवाणीतः दूरदर्शनतश्च प्रसारितानि जातानि। संस्कृते भवन्तः गद्यपद्ये रचनामकार्षुः। श्रीमद्भिः नैकान्याख्यानानि कथाः, काव्यानि जीवनचरितानि लिखितानि। भवन्तः राष्ट्रपतिना सम्मानमलभन्त। श्रीवाणीअलङ्करणेन भवन्तः समादृताः। राजस्थानराज्यस्य सर्वोच्चसम्मानः संस्कृतशिखर-सम्मानः एकलक्ष्यरूप्यात्मकः भवद्भ्यः संस्कृतदिवसा-

वसरे समर्पितः। भवन्तो भाषाविभागस्य राजस्थान-संस्कृतशिक्षाविभागस्य च निदेशकपदमलञ्चक्रुः। संस्कृतअकादम्याः अध्यक्षपदमशोभयन्त। केन्द्रसर्वकारीयशब्दरचनासमित्याः श्रीमन्तः सदस्या अभूवन्। राष्ट्रपतिसम्मानसमित्या अपि भवन्तः सदस्याः। भवन्तः संस्कृतस्य नवीनरचनायाः समीक्षकाः सन्ति। भवत्सु वैशिष्ट्यं विद्यते यत् गोष्ठ्यामाहूताः सद्यः समुपस्थापिते विषयेऽपि साधिकारं विशदरूपेण च तथा वदन्ति यथा पूर्वमधीतचरो विषयः स्यात्। ब्रजभाषायामपि भवद्भिः काव्यरचना विहिता। ब्रजभाषाया माधुरी सुप्रसिद्धा वर्तते। किमधिकं, भवत्सु ये गुणाः विद्यन्ते तेऽन्यत्र सुदुर्लभाः। भारत्या नववर्षप्रवेशावसरे भारतीपरिवारः सादरं भवन्तं प्रणमति। भवतां दीर्घायुष्यं श्रेष्ठस्वास्थ्यं च कामयते।

अधुना भारत्या लेखकान् वयं स्मरामः। लेखकेषु डा. राजेश्वरीभट्टमहोदया विंशतिवर्षेभ्यस्ततोऽप्यधिकेभ्यो वा निरन्तरं नारीस्तम्भे स्वीयां रचनां लिखति। भवत्याः संस्कृतं प्राञ्जलं पाण्डित्यपूर्णं सरलं च भवति। लेखनकलाकुशलतयैव पाठको यदा भवदीयां रचनां पठति तदा सम्पूर्णां कथां पठित्वैव विरमति। पठनकाले अग्रे किं वर्तते इति ज्ञातुमुत्सकः पाठकः आत्मानमेव विस्मरति। भवती साहित्याचार्या एम.ए. संस्कृतविषये वर्तते। लालबहादुरशास्त्रिमहाविद्यालये आचार्यपदमलञ्चकार। भवत्याः पाठनशैली अत्यन्तं सुरुचिरा वर्तते। भवत्याः कक्षायां शतशः छात्राः होरापर्यन्तं निःशब्दं भवदीयाध्यापनमश्रृण्वन्। एतादृशी कुशला सक्षमा आचार्याऽन्यत्र सुदुर्लभा विद्यते।

सेवानिवृत्त्यनन्तरमपि भवती गृहे समागतानां शोधछात्राणां मार्गदर्शनं करोति। निर्धनेभ्यश्छात्रेभ्यः शिक्षायै धनं यच्छति स्वयमपि गृहे तान् पाठयति। किमधिकं, नैके छात्रास्तत्रैव निवसन्ति पठन्ति भोजनं कुर्वन्ति। डॉ. श्रीकृष्णशर्माणः भट्टमहोदयानां गृहे स्थित्वैव एम.ए. परीक्षामुत्तीर्य जोधपुरविश्वविद्यालयस्य संस्कृतविभागाध्यक्षपदात् सेवानिवृत्ताः सन्ति। तेऽधुनापि निःसङ्कोचं भट्टमहोदयानां गृहे आगच्छन्ति कृतज्ञतां च प्रकटयन्ति। गङ्गाधरभट्टमहोदयानां निधनानन्तरं डॉ. राजेश्वरीभट्टमहोदया तेषां स्मृतौ राजगङ्गाचेरिटेबलट्रस्टमरचयत्। अस्मिन् ट्रस्टे सर्वं धनमनयैव प्रदत्तं, न परस्य किञ्चिदपि तत्र स्वीकृतम्। ट्रस्टः संस्कृतस्य प्रचाराय प्रसाराय राजनस्थानस्य विभिन्नाभ्यः संस्थाभ्यः विभिन्न- कार्यक्रमाणामायोजनाय धनं प्रयच्छत्ति। संक्षेपतः संस्कृतस्य प्रचाराय प्रसाराय च ट्रस्टः सर्वश्रेष्ठं कार्यं करोति। अस्मिन्नवसरे भारती-परिवारः श्रीमत्यै राजेश्वरीभट्टमहोदयायै दीर्घायुष्यं श्रेष्ठं स्वास्थ्यं च कामयते, सादरं स्नेहप्रणामाञ्जलिं च समर्पयति।

नववर्षप्रवेशासरे वयं-आयुर्वेदस्तम्भलेखकान् राष्ट्रपतिसम्मानितान् जोधपुरस्थ आयुर्वेदविश्वविद्यालयस्य कुलपतिचरान् परमपूज्यान् मान्यान् बनवारीलालगौड़महोदयान् सादरं प्रणमामः। पीयूषपाणयो भवन्तश्चिकित्साकर्मणि नितान्तं कुशला वर्तन्ते। विदेशेष्वपि भवन्तः स्वनिर्मितयन्त्रमाध्यमेन तत्रत्यानायुर्वेदस्य महत्वं प्रादर्शयन्। भवन्तो व्याकरणदर्शनशास्त्राणामप्यधिकारिणो विद्वांसो वर्तन्ते। भवद्भिः नैका गद्यपद्यात्मिकाः संस्कृते कथाः सारल्येनायुर्वेदं पाठयितुं लेखाः पत्रपत्रिकासु लिखितः। भवन्तो नैकाभिः संस्थाभिः सम्मानिताः। भवन्तः संस्कृतस्य मासिकपत्रिकायै भारत्यै प्रतिमासं आयुर्वेदस्तम्भाय संस्कृते हिन्द्यां च लेखं लिखन्ति। एतेन ऋतुचर्या ज्ञायते।

पाठकाश्च तदनुसारं जीवनचर्यामाचरन्तः स्वास्थ्यलाभं प्राप्नुवन्ति। भारतीपरिवारो भवद्भ्यो दीर्घायुष्यं श्रेष्ठं स्वास्थ्यं च कामयते।

जैनदर्शनस्याधिकारिणो विद्वांसः श्रीप्रेमचन्द्रराँवका महाभागा भारत्यै सूक्तिसुधां लिखन्ति। भवल्लिखिताः सूक्तयः सदैव नवीना भवन्ति। जैनग्रन्थेभ्योऽन्वेषणं विधाय शिक्षाप्रदाः नवीनाः सूक्तयो नान्येन केनापि संप्रेषिता भारत्यै अद्यावधि। भवन्त एव महता परिश्रमेणान्विष्य प्रतिमासं शिक्षाप्रदाः सूक्तीः भारत्यै प्रेषयन्ति। जैनदर्शनातिरिक्तमन्यदर्शनानामपि श्रीमन्तः प्रौढा विद्वांसो वर्तन्ते। नैकाभिः संस्थाभिः भवन्तः सम्मान-मलभन्त। नववर्षप्रवेशावसरे भारतीपरिवारो भवद्भ्यो दीर्घायुष्यं श्रेष्ठं स्वास्थ्यं च कामयते।

श्रीमन्तः सुरेन्द्रशर्माणो नैकवर्षेभ्यो भारत्या लेखानामक्षरशोधनं सहसम्पादकीभूय कुर्वन्ति। संस्कृतविभागस्य निदेशकचराः संस्कृतमहाविद्यालयानां प्राचार्यचराः शब्दशास्त्रस्य विलक्षणा विद्वांसो भवन्तः संस्कृते काव्यं सृजन्ति। भवदीयलेखेषु काव्येषु च प्रसाद-माधुर्य-गुणसंवलितं स्वारस्यं दृष्टिपथमायाति। भवन्तः साहित्यशास्त्रस्याधिकारिणो विद्वांसो वर्तन्ते। ग्रन्थ-ग्रन्थि विमोचने कुशलाः संस्कृतजगति सभासु गोष्ठीषु च सदैव सादरं समाहूयन्ते। हिन्द्यां संस्कृते च भवन्तो धाराप्रवाहेण भाषन्ते। नववर्षप्रवेशावसरे भारतीपरिवारो भवद्भ्यो दीर्घायुष्यं श्रेष्ठं स्वास्थ्यं च कामयते।

भारत्याः सहसम्पादकाः श्रीशिवशरणनाथत्रिपाठिनो व्याकरणशास्त्रस्य विलक्षणविचक्षणा विद्वांसो वर्तन्ते। भवन्तोऽत्यन्तं व्यस्ताः वर्तन्ते। नैकानि समाजहित-साधकानि कार्याणि निरन्तरं सम्पादयन्ति। व्यस्ततमा अपि भारत्याः सहसम्पादकत्वं निरन्तरं सावधानाः निर्वहन्ति। लेखेषु अशुद्धयो भवद्भिः सावधानतया शोध्यन्ते। संस्कृतस्य गद्ये-पद्ये च भवतां समानोऽधिकारः। नववर्षप्रवेशावसरे भारतीपरिवारो भवद्भ्यो दीर्घायुष्यं श्रेष्ठं स्वास्थ्यं सुखीजीवनं च कामयते।

भारत्याः प्रबन्धसम्पादकाः पं. सुदामाशर्माणः राष्ट्रीयस्वयंसेवकसंघस्य प्रचारकाः विद्यन्ते। दादाभाई गिरिराजशास्त्रिणोऽनन्तरं भारत्याः प्रबन्धसम्पादकधुरं भवन्तः सहजरूपेण वहन्ति। भवतां प्रबन्धसम्पादकत्वे भारत्याः शोभा नवीना जाता। अधुना भारत्यां श्रेष्ठानि स्निग्धानि कर्गदानि प्रयुज्यन्ते। चित्राणि रञ्जितानि आकर्षकाणि च संलक्ष्यन्ते। मुखपृष्ठमतीव स्निग्धं नैकरङ्गरञ्जितं भवति। मुखपत्रं दृष्ट्वैव पाठकाः समाकर्षिता जायन्ते। श्रीसुदामाशर्माणः कार्यालये स्थित्वा सर्वं कार्यं सारल्येन सम्पादयन्ति। समये लेखान् मुद्रणालये प्रेषयन्ति। ततश्चाक्षरशोधकेभ्यः प्रेषयन्ति। प्रथमवारं शोधितं लेखं पुनः मुद्रणालये प्रेषयन्ति, पुनः शोधकेभ्यः प्रयच्छन्ति ततश्चाऽन्तिमं शोधितं लेखं प्रधानसम्पादकानां सविधे प्रेषयन्ति। धनस्य व्यवस्थामपि भवन्त एव कुर्वन्ति। विभिन्नसंस्थाभ्यो विज्ञापनानि भवतामेव प्रयत्नेन मिलन्ति। समये पत्रप्रेषणालये (पोस्टआफिस) प्रेषयन्ति। भवतामेव प्रयासेन ग्राहकसंख्यापि वर्धते। भवन्तोऽत्यन्तं व्यस्ताः संघकार्यमपि प्रतिदिनं सम्पादयन्ति। विदुषां सम्मानोऽपि भवद्भिर्विधीयते। नववर्षप्रवेशावसरे भारतीपरिवारो भद्भ्यो दीर्घायुष्यं श्रेष्ठं स्वास्थ्यं च कामयते। भवन्तः स्वकर्मणि सदा सफला भवन्तु।

पं. अविनाशशर्माणः सततमुद्यमशालिनो भारत्यै समर्पिताः कार्यकर्तारो विद्यन्ते। इमे प्रतिमासं

''भारतभूम्या विभूतयः' लेखं संस्कृते हिन्द्यां च लिखन्ति। भवन्तो दादाभाई गिरिराजशास्त्रिणां पौत्राः सन्ति। अतः परम्परातः ते सर्वे गुणा भवत्स्वपि विद्यन्ते ये पितामहेऽविद्यन्त। एते विदुषां गृहे गत्वा लेखानानयन्ति ततो मुद्रणालये प्रयच्छन्ति ततश्चाक्षरशोधकेभ्यो विद्वद्भ्यः प्रयच्छन्ति। प्रबन्धसम्पादकानां निर्देशानुसारं तत्क्षणं कार्यं सम्पादयन्ति। विदुषामादरं कुर्वन्ति। भारतीकार्यालये समागतानां लेखकानाम् अन्येषां च शङ्कायाः समाधानं कुर्वन्ति। भारतीपरिवारो भवद्भ्यश्चिरायुष्यं सुदृढं स्वास्थ्यञ्च कामयते। भवन्तः सदैव स्वकार्ये साफल्यं प्राप्नुवन्तु।

श्रीराजीवशर्माणः सवैतनिकाः कार्यकर्तारो विद्यन्ते। एते समागतानि पत्राणि प्राप्तिपञ्जिकायां समुल्लिखन्ति। पत्राणामुत्तरं प्रयच्छन्ति एतदर्थं पृथक् पञ्जिकां धारयन्ति। दूरभाषं शृण्वन्ति। ग्राहकेभ्यः संप्राप्तं धनं कोषाकार्यालये भारत्याः संग्रहपत्रे स्थापयन्ति। ततश्च प्रबन्धसम्पादकाना-माज्ञया-आवश्यकतानुसारं कोषाकार्यालयात् धनमान-यन्ति। निर्धारिते समये पत्रिकां पत्रप्रेषणालये प्रयच्छन्ति। भवतां स्वभावः सरलो वाणी च मधुरा वर्तते अतः आगन्तुका भवद्व्यवहारेण प्रसीदन्ति। नववर्षप्रवेशावसरे भारती परिवारो भवद्भ्यः चिरायुष्यं श्रेष्ठं स्वास्थ्यं सदैव साफल्यञ्च कामयते।

अन्ये च ये विद्वांसः शोधच्छात्राश्च ये सारगर्भितान् शोधपूर्णान् लेखान् लिखन्ति तेभ्यः सर्वेभ्यो नववर्षप्रवेशावसरे दीपावलिपर्वणि भारतीपरिवारो जीवने साफल्यं सौख्यञ्च कामयते। अन्ते च भारत्याः संरक्षकेभ्यः परमपूज्येभ्यः सर्वेभ्यः भारतीपरिवारो दीपावलिपर्वणि सादरं सश्रद्धं प्रणामाञ्जलीः समर्पयति। भवद्भ्यः शुभाशिषञ्च कामयते।


**समस्त देशवासियों को दीपावली की हार्दिक शुभकामनाएं :-**



# कैलाश शर्मा महन्त



**मोती डूंगरी गणेश मंदिर ट्रस्ट**

**मोती डूंगरी रोड़, जयपुर**

# श्रीकृष्णमन्त्रमहास्तोत्रम्

( श्रीकृष्णःशरणं मम )

( पूर्वानुवृत्तम् )

❑ आचार्य पं. नथमलशास्त्री दाधीचः

देवो वैश्वानरः कृष्णः प्राणिनां देहमास्थितः।
सोमो रसात्मकः कृष्णः श्रीकृष्णः शरणं मम।। 202।।
सर्वं कृष्णमयं दृश्यमग्निसोमात्मकं जगत्।
स्थूलं भगवतो रूपं श्रीकृष्णः शरणं मम।। 203।।
रसानन्दोऽमृतं ब्रह्म कृष्णो भक्तिरसोद्भवः।
आनन्दविग्रहः कृष्णः श्रीकृष्णः शरणं मम।। 204।।
सर्वेश्वरः सदासौख्यः सर्वदुःखहरो हरिः।
समर्थः शक्तिसम्पन्नः श्रीकृष्णः शरणं मम।। 205।।
कृष्णो मे जाग्रते स्वप्ने सुषुप्तौ कृष्ण एव हि।
तुरीये मानसे कृष्णः श्रीकृष्णः शरणं मम।। 206।।
प्रभविष्णुर्विभुर्विष्णुर्भ्राजिष्णुर्भुवनेश्वरः।
सहिष्णुः शान्तिदः सौम्यः श्रीकृष्णः शरणं मम।। 207।।
सङ्गत्या सेवया प्रीत्या भक्तानां महतां सताम्।
प्रीतः कामदुघः कृष्णः श्रीकृष्णः शरणं मम।। 208।।
वेदव्यासो मुनीनाञ्च वासुदेवश्च सात्वताम्।
गायत्री छन्दसां कृष्णः श्रीकृष्णः शरणं मम।। 209।।
सर्वाश्चर्यमयो देवो ह्यनन्तो विश्वतोमुखः।
योगेशोऽनन्तरूपश्च श्रीकृष्णः शरणं मम।। 210।।
अधिदेवः स्वयं कृष्णः कृष्णश्चैवाधिभौतिकः।
अध्यात्ममखिलं कृष्णः श्रीकृष्णः शरणं मम।। 211।।
बलो हलधरो रामः प्रलम्बासुरनाशनः।
गोपः सगोधनः कृष्णः श्रीकृष्णः शरणं मम।। 212।।
पीत्वा मुखेन दावाग्निं गोपगोधनरक्षकः।
योगमायोदयः कृष्णः श्रीकृष्णः शरणं मम।। 213।।
जयतां प्रभवः कृष्णो देवदेवो जगत्पतिः।
शाश्वतः पुरुषः कृष्णः श्रीकृष्णः शरणं मम।। 214।।
रुद्राणां शंकरः कृष्णो देवानां वासवो हरिः।
भूतानां चेतना कृष्णः श्रीकृष्णः शरणं मम।। 215।।
निर्गुणोऽपि गुणातीतः कृष्णो ज्ञानधनो विभुः।
सदाभासः सदानन्दः श्रीकृष्णः शरणं मम।। 216।।
रुक्मिणीवल्लभः कृष्णः कृष्णो जाम्बवतीपतिः।
सत्यभामाप्रियः कृष्णः श्रीकृष्णः शरणं मम।। 217।।
कालिन्दीलक्ष्मणासत्याभद्राप्राणेश्वरः प्रभुः।
मित्रविन्दापतिः कृष्णः श्रीकृष्णः शरणं मम।। 218।।
उपासितोऽष्टलक्ष्मीभिर्भक्त्या श्रीद्वारकेश्वरः।
लक्ष्मीनाथो रमानाथः श्रीकृष्णः शरणं मम।। 219।।
हृदिस्थो योगयुक्तानां भगवान् प्रणतार्त्तिहा।
सद्भक्तभक्तिसन्तृप्तः श्रीकृष्णः शरणं मम।। 220।।
कृष्णोऽखिलसमाम्नायपुराणोपनिषद्गतिः।
संस्तुतः श्रुतिभिर्नित्यं श्रीकृष्णः शरणं मम।। 221।।
जगद्योनिर्जगत्स्रष्टा भर्ता धर्ता जगत्प्रभुः।
पुरुषस्त्रिगुणातीतः श्रीकृष्णः शरणं मम।। 222।।
कृष्णः केवलया भक्त्या देवक्याः पुत्रतां गतः।
वासुदेवोऽपि व्यूहाङ्गी श्रीकृष्णः शरणं मम।। 223।।
ब्रह्मेति परमात्मेति कृष्णश्चैवादिपूरुषः।
कृष्णः क्षराक्षरातीतः श्रीकृष्णः शरणं मम।। 224।।
शान्तानां भक्तियुक्तानां न्यासिनां परमा गतिः।
श्रीमन्नारायणो देवः श्रीकृष्णः शरणं मम।। 225।।
जयशब्दैर्नमः शब्दैर्नृत्यैर्भवभयैर्हरिः।
प्रीतो नटवरः कृष्णः श्रीकृष्णः शरणं मम।। 226।।
ईश्वरः सत्यसंकल्पः पुण्यश्रवणकीर्तनः।
मन्त्रः परमकल्याणः श्रीकृष्णः शरणं मम।। 227।।
श्रीवत्साङ्को घनश्यामः पीतवासाः स्मिताननः।
भगवान् भगशब्दार्थः श्रीकृष्णः शरणं मम।। 228।।
सर्वात्मप्रभवो देवः सर्वाघौघहरो हरिः।
यज्ञैः संकीर्तनैः सेव्यः श्रीकृष्णः शरणं मम।। 229।।
मायामनुष्यभावस्थो गूढैश्वर्यो जगद्गुरुः।
यदूत्तमोत्तमः कृष्णः श्रीकृष्णः शरणं मम।। 230।।
सर्वाङ्गसुन्दरः कृष्णो वनमालाविभूषितः।
केवलानुभवानन्दः श्रीकृष्णः शरणं मम।। 231।।

''जय जय श्री कृष्ण मन्त्र महास्तोत्रे षष्ठो विरामः''

।। श्रीकृष्णः शरणं मम।।

( पूर्वप्राध्यापकः ), पो.-छापर ( चूरू )

# लक्ष्मीलीलाविलास-रथोत्सवः

❑ पं. श्रीकृष्णलालशुक्लः

जय जय विभो विश्व-व्यापिन् शिरोमणिदेव हे !
चरणनखजं गङ्गातोयं पुनातु मनस्तव।
गतकलिमलो येनाहं ते सुरासुर-वन्दितं
पद-सरसिजं चित्ते शुद्धे लभे मनसो मुदे।। 1।।

जलद-समये पक्षे शुद्धे द्वितीय-हिमांशुभे
सरस - दिवसे ह्याषाढेऽके प्रसङ्क्रमिते युगे।
कृषकचलचित्तोत्कर्षाढ्यः शिवाय जगतस्तव
अहह सुखदो लक्ष्मीलीलाविलास-रथोत्सवः।। 2।।

अपि विमलो मायातीतो मया सह खेलसि
प्रमुदितमनाःपुष्पोद्याने सखीजन-मण्डितः।
कुसुमशयनं वर्षाकालः सह संस्थितिः
न खलु तथापीहा रत्यामतो जयसि प्रभो।। 3।।

रजसि बहले संसारे रे कथं सुकृतं भले
प्रचुर-तपसि भ्रान्तः क्लान्तः पथश्चलितः सतः
शरणद ! कृपादृष्टिलीलां भवाब्धि-भयापहां
वितर मयि प्रेम्णा कृष्णे शिवाय सदा मम।। 4।।

सदय-हृदयः प्राणाधीशः प्रिया-स्खलने यथा
जगति सहते चित्ते नान्यद् विचिन्तयेऽपि किम् ?
कपिलमणि-लक्ष्मी-शोभाढ्या चतुर्भुज-भूरुहो
नव-कुसुमिता रक्ष्या कृष्णाप्रियेव लता यथा।। 5।।

त्याजं त्याजं विषयजं नारकं भोगजातं
स्थायं स्थायं सुरसरितटे मन्दिरे वा शिवस्य
गायं गायं पशुपतिगुणं वाङ्मनो-मोहनाशं
काङ्क्षे द्रष्टुं भवभयहरेः पादपद्मं मुरारेः।। 6।।

जयपुरम्

# नूतनकाव्यपृषताः

❑ डॉ. हर्षदेवमाधवः

## मातुर्वक्षसि

मातुर्वक्षसि
सुप्तश्शिशुः।
न जानाति
कुरूपतां
सृष्टेर्वा स्वस्य वा।
मातुर्वक्षसि
विश्वस्य करुणा
तं सान्त्वयति
यस्यां विनश्यति
विश्वक्रूरता।
मातुर्वक्षसि
सप्तसमुद्रकोलाहलः शाम्यति
शिशुः
लभते पृथ्व्या एकीभूतमानन्दम्।
मातुर्वक्षसि
सदैव प्रसरति पौर्णमासी।
मातुर्वक्षसि
भाषारहितं सुखं वर्तते
वर्तते निरपेक्षः स्नेहराशिः,
अनर्गला वात्सल्यवृष्टिः।
अक्षयिष्णुर्मधुकोषः।
मातुर्वक्षसि
स्तन्यकणिकाया अन्यद्
अमृतं न कोऽपि जानीते –
अवतारान् गृहीत्वा परमेश्वरोऽपि।

## कपिलवास्तुनगर्यां भदन्ताय

चलनेन
गन्तव्यस्थानस्य दूरता
न दूरीभवति।
नागवम्यते
हृदयं
संलापेन।
श्रवणेन न श्रूयते
यदस्ति श्रोतव्यम्।
पादयोः पर्वतभारोऽनुभूयते
तथापि
मार्गाः क्षितिजावसानं
न दर्शयन्ति।
बुभुक्षितं मनः
न तृप्तिमेति।
गोपृष्ठव्रणेषु मक्षिका इव
स्मृतयः पीडयन्ति।
स्पर्शान् दर्पणवद्
भ्रंशयित्वा
हस्तौ शिथिलौ जातौ।
श्रद्धायाः शवं
कर्षन्ति शङ्का-पिपीलिकाः।
हे भदन्त!
कपिलवास्तुनगर्यां
दिवापि तिमिरमस्ति।
तत्र
दीपप्रज्ज्वालने न किम्?

8, राजतिलक बंग्लोज, आबादनगरम्,
बसस्टोप के पास, बोपल, अहमदाबाद-380058

# भारतराष्ट्रपरिचयः

❑ डॉ. सुरेन्द्रकुमारशर्मा

स्वायम्भुवस्य मनोर्ज्येष्ठपुत्रस्य प्रियव्रतस्य दश पुत्रा आसन्। तेषु सप्तैव उत्तराधिकारिरूपेण सप्तद्वीपानां नृपतयो बभूवुः। त्रयः पुत्रा योगपरायणा उत्तराधिकारं नैव गृहीतवन्तः। द्वीपाधिकारिणां सप्त पुत्राणां नामान्यधिकृत-द्वीपानुसारं निम्न प्रकारेण उल्लेखनीयानि सन्ति–

(१) आग्नीध्रः– जम्बूद्वीपनृपः

(२) मेधातिथिः–प्लक्षद्वीपनृपः

(३) वपुष्मान्–शाल्मलीद्वीपनृपः

(४) ज्योतिष्मान्–कुशद्वीपनृपः

(५) द्युतिमान्–क्रौञ्चद्वीपनृपः

(६) भव्यः– शाकद्वीपनृपः

(७) सवनः–पुष्करद्वीपनृपश्च।

शेषाणां त्रयाणां पुत्राणां नामानि मेधा अग्निबाहुः पुत्रश्चासन्।

**जम्बूद्वीपस्य विभाजनम्–**

आग्नीध्रस्य नव पुत्रा आसन्। तेषां नामानि सन्ति– (१) नाभिः (२) किम्पुरुषः (३) हरिवर्षः (४) इलावृतः (५) रम्यः (६) हिरण्वान् (७) कुरुः (८) भद्राश्वः (९) केतुमालश्च।

आघ्नीध्रः जम्बूद्वीपस्य नवधा विभाजनं कृत्वा प्रत्येकमेकैकस्याधिकारिणं कृतवान्। विभाजितानां नवखण्डानां नामान्यधिकारिक्रमेण निम्नानुसारं निर्दिष्टानि सन्ति–

(१) नाभिः– हिमवर्षः (२) किम्पुरुषः–हेमकूटः (३) हरिवर्षः–नैषधवर्षः (४) इलावृतः–इलावृतवर्षः (५) रम्यः–नीलाचलवर्षः (६) हिरण्वान्–श्वेतवर्ष (७) कुरुः–उत्तरकुरुवर्षः (८) भद्राश्वः–भद्राश्ववर्षः (९) केतुमालः–गन्धमादनवर्षः

**नाभिवंशः**

नाभेरेक एव पुत्र आसीत्। तस्य नाम ऋषभ इत्यासीत्। ऋषभस्य शतं पुत्रा आसन्। तेषु भरतः ज्येष्ठ आसीत्। नाभेर्हिमवर्षम् ऋषभः प्राप्तवान्। ऋषभात् हिमवर्षः भरतेन सम्प्राप्तः। अस्य ऋषभपुत्रस्य भरतस्य नाम्नैव हिमवर्षः कालान्तरे भारतवर्ष इति नाम्ना प्रसिद्धो बभूव इति पुराणैर्विज्ञायते।

अस्यापि भारतवर्षस्य पुनर्नवधा विभाजनं सञ्जातम्। अतएव भारतभूभागे नवद्वीपानां स्थितेरुल्लेखाः उपलभ्यन्ते– (१) इन्द्रद्वीपः (२) कसेरुद्वीपः (३) ताम्रपर्णद्वीपः (४) गभस्तिमान् द्वीपः (५) नागद्वीपः (६) सौम्यद्वीपः (७) गन्धर्वद्वीपः (८) वारुणद्वीपः (९) कुमारीद्वीपश्च। वर्तमाने कुमारीद्वीपपर्यन्तिको भाग एव भारतवर्ष इति नाम्ना विज्ञायते। सुदीर्घकालात् इदमेव नाम अस्य कृते सुप्रचलितमस्ति।

भरतस्य नाम्ना अयं देशो भारतमित्युच्यते स्म इति सन्दर्भे 'भरत' शब्दस्यार्थो विचारणीयोऽस्ति। अस्मिन् विषये वैदिकनिघण्टुकारो भगवान् यास्को यज्ञसम्पादकानां ऋत्विजाम् अष्टौ नामान्युल्लिखति। अतिन्यूनं चत्वारः भवन्ति, अतएव भगवता यास्केन बहुवचने तत्र निर्देशः कृतः। 'भरताः' इत्यस्य स्थाने क्वचिद् 'भारताः' क्वचित् सहैव उल्लेखोऽपि प्राप्यते। भरतः क इति सन्दर्भे शतपथब्राह्मणे वचनमस्ति–

(१) ''प्रजापतिर्वै भरतः स हीदं सर्वं बिभर्त्ति'' (शत.ब्रा.५/८/१/१४)

(२) प्रजापतिर्वै मनुः स इदं सर्वम् अमनुत।'' (शत.ब्रा. ९/६/१/१९)

शतपथमतेन मनुरेव भरतसंज्ञक आसीत्। प्रजापतित्वात् प्रजाया भरणपोषणकर्तृत्वात् तदीयं भरतत्वं विज्ञापितं भवति।

कौषीतकिब्राह्मणे तूक्तम्-

**''अग्निर्वै भरतः स वै देवेभ्यो हव्यं भरति''**

(कौषी.ब्रा. ३/२)

शतपथब्राह्मणस्यैवाधोलिखितेन वचनेनास्य पुष्टिर्भवति-

**''एष हि देवेभ्यो हव्यं भरति तस्माद् भरतोऽग्निरित्याहुः।''** (शत.ब्रा. १/४/२/२)

अग्निर्हि देवानां यज्ञहव्येन भरणपोषणं करोति अतएवाग्नेरपि भरतसंज्ञा। भरतस्योक्तं वैशिष्ट्यं मनसि कृत्वैव भगवान् ऋषभः स्वपुत्रस्य नाम भरत इति चक्रे। यद्यपि यज्ञोपासकत्वात् ततः पूर्वमपि अस्मद्देशीया प्रजा भारती इत्युच्यते स्म।

महाकविः कालिदासोऽपि दुष्यन्तपुत्रस्य भरतस्य नामकरणसन्दर्भे अमुं रहस्यं गूढं प्रवक्ति-

**इहायं सत्त्वानां प्रसभदमनात् सर्वदमनः।**
**पुनर्यास्यत्याख्यां भरत इति लोकस्य भरणात्।।** (अभि.शाकु. ७/३३)

अयमपि भरतो मनुतुल्यतां प्राप्तवान् किन्तु भारत इति नामकरणे ऋषभपुत्रो भरत एव हेतुर्न तु दुष्यन्तपुत्रो भरतः। तथापि दुष्यन्तपुत्रस्य भरतस्य महत्त्वम् अस्यां परम्परायां वैदिकयज्ञियसंस्कृतेः परिपोषकत्वात् स्वीक्रियते। ऐतरेय ब्राह्मणस्योल्लेखानुसारम् अयं भरतः त्रयस्त्रिंशदुत्तरशतमितानि यज्ञानि अश्वमेधसंज्ञकानि सम्पादितवान्। अस्य चक्रवर्त्तित्वे यज्ञियदेशानां पर्याप्तं विस्तारः समभवत्।

यज्ञियसंस्कृतेः प्रसाराद् भारते म्लेच्छत्वस्य सर्वथाऽपहारः संजातः। अतएव मानवीयाचार-व्यवहारयोर्विशुद्धतायाः संस्थापनाद् भारतस्य महत्त्वं विश्वस्मिन् विश्वे अवर्धत। भगवतो मनोः काले एव म्लेच्छस्वापहारस्य प्रक्रिया प्रारभत। अतएव मनुस्मृतौ ब्रह्मावर्त्तः, ब्रह्मर्षिदेशः, आर्यावर्तः, यज्ञियदेशश्चास्य संज्ञा उपलभ्यन्ते। अस्मादतिरिक्तावशिष्टभूभागस्य कृते म्लेच्छसंज्ञा व्यवहारः प्राप्यते।

भाषिकव्यवहारेऽपशब्दानां प्रयोगात्तेषां म्लेच्छत्वम्। भारते तु भगवता पाणिनिना बहुपूर्वं देववाण्या माध्यमेन भाषायां विशुद्धव्यवहाराय शब्दोपदेशः कृत आसीत्। अस्य शब्दानुशासनस्य परम्परया म्लेच्छत्वमत्र तत एव निराकृतमासीत्। भारतस्य विश्वगुरुत्वेऽपि इदमेव प्रमुखकारणमासीद् यत् अत्रत्यायां संस्कृतभाषायामपशब्द-विवेको नास्ति शब्दानामेवानुशासनमत्रोद्दिष्टम्।

प्राचार्यचरः श्री दादू महा., जयपुर

पुस्तकसमीक्षाः

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

# शाक्तोपासनाग्रन्थः

काश्मीरेषु शाक्ततन्त्रानुमोदिता साधना प्राचीनकालादेव सुप्रचलिताऽस्तीति विदन्त्येव विद्वांसः। उपासनायामस्यां महाविद्यानां साधना, पूजादिकं च सविस्तरमनुष्ठीयते। पूजायाः पूर्वं भूतशुद्धि-यंत्रस्थापन-न्यास-ध्यानादिकं विधीयते, पात्रासादनं, सविधिपूजनं, जप-स्तोत्रादिकं, नैवेद्यतर्पणादिकमपि क्रियते। उपास्यदेव्याः सहस्रनामादिकमपि शाक्तोपासनायामुच्चार्यते। षोडश्याः साधनायां तादृशस्यैकस्य सहस्रनामपाठस्य परम्परा काश्मीरेषु प्रचलिताऽस्ति यस्य नामास्ति ''श्रीराज्ञीदेवीसहस्रनामे'' ति। राज्ञी भगवती राजराजेश्वरी महाविद्या महिमशालिनी विद्यत एव। एतस्याः सहस्रनामस्तोत्रं 153 पद्येषु भैरवसंवादरूपेण प्राप्यते। तादृशस्य सहस्रनामस्तोत्रस्य सानुवादं सम्पादनं सपद्येव प्रकाशितमिति प्रमोदावहम्।

सहस्रनामनिरूपणाख्ये ग्रन्थेऽस्मिन् तंत्रशास्त्र-विवेचकेन डॉ. चमनलाल रैना महाभागेन प्रत्येक नाम्नो हिन्दीभाष्यं प्रस्तुतमस्ति, नाम्नां महत्त्वं प्रभावादिकं चाऽपि भाष्ये विवृतमस्ति। नामभिः सह 'स्वाहा' शब्द प्रयोगोऽपि सर्वत्र परिलक्ष्यते। एतद्धि निगमागमयोः समन्वयस्य स्पष्टमुदाहरणम्। द्वयोरनयोः समन्वयस्यास्ति पुरातनी परम्पराऽस्माकं संस्कृताविति सर्वदाऽहं ब्रवीमि। तदनुरूपमेव प्रत्येकं नामात्र ''ओं रम्यायै स्वाहा'' ओं रमणायै स्वाहा ओं रेवत्यै स्वाहा इत्यादिरूपेण मुद्रितमस्ति। प्रणवः स्वाहाकारश्च नैगमपरम्पराया आधारभूतं तत्त्वमिति स्पष्टमेव।

ग्रन्थस्यास्य प्रकाशनं गुर्जरप्रदेशस्थसोमनाथ-संस्कृतविश्वविद्यालयेन कृतं, सम्पादनं च विश्व-विद्यालय-कुलपतिना प्रो. अर्कनाथ चौधरीवर्येण कृतमस्ति। ग्रन्थेनानेन हिन्दीभाषाभिज्ञाः पाठका व्यापकरूपेणोपकृता भविष्यन्तीति स्पष्टमेव।

**श्रीराज्ञीदेविसहस्रनामनिरूपणम् रचयिता डॉ. चमनलाल रैना प्रधानसम्पादकः प्रो. अर्कनाथ चौधरी प्रकाशकः श्रीसोमनाथसंस्कृतविश्व-विद्यालय, वेरावल गुजरात पृ.सं. 210 मूल्यम् 425/-.**

## दुर्गासप्तशती प्रस्तुतिः

देशेऽस्मिन् शक्त्युपासना सहस्राब्दीभ्यः प्रचलति। वासन्तिकनवरात्रेषु शारदनवरात्रेषु च दुर्गापूजा सर्वत्र भारते सश्रद्धं विधीयते। प्रमुखतोऽस्यामुपासनायां मार्कण्डेयपुराणगता त्रयोदशाध्यायबद्धा दुर्गासप्तशती पठ्यते। तस्या एवाङ्गभूतानि कृत्यानि नवार्णमन्त्रजप, कवचार्गलाकीलकजपप्रभृतीनि सविस्तरमनुष्ठीयन्ते शाक्तोपासकैः। काश्मीरेषु तन्त्रोक्तपूजापरम्परा शताब्दीभ्यः प्रचलति। एवंविध एव सुप्रतिष्ठितः शक्तोपासकोऽभूत् काश्मीरकः पं. राजानकनिरञ्जननाथ-रैनामहाभागः। काश्मीरेषु 1906 ई. वर्षे लब्धजन्माऽयं राजस्थाने अजमेरनगरे समागतः, अत्रैवास्य परिवारो न्यवसत्। डॉ.चमनलाल रैनावर्यः शाक्तपरम्पराऽभिज्ञोऽस्ति, भारते, फ्लोरिडा (अमरीका) प्रदेशे चाऽप्ययमध्यापनं कृतवानस्ति। 1999 ई. वर्षे निरंजननाथवर्यस्य निधनमभूत्।

एतेन स्वजीवनकाले सप्तशतीपाठविधिः सविस्तरं

विलिखितोऽभूद् यत्र न्यास-ध्यान-स्तोत्रपाठादीनां विधानं वर्णितमभूत्। सप्तशती नोद्धृताऽभूद् यतः सर्वत्र सुलभाऽस्त्येव। अस्यां पद्धतौ करन्यासादिकं गायत्रीमन्त्रेण क्रियते, अन्यो विधिः शाक्तमन्त्रैः क्रियते इति विलोक्य साश्चर्यं हर्षमनुभविष्यन्ति विवेचकाः निगमागमयोरयं समन्वयोऽस्माकं संस्कृतेः समर्हणीयो विशेषोऽस्तीत्यहं स्पष्टं प्रस्तौमि बहुधा। स एवात्र प्रत्यक्षं वीक्ष्यते। गायत्रीमन्त्रो वैदिकः, नवार्णमन्त्रस्तान्त्रिकः प्रतिमन्त्रं काऽस्य देवता, कः ऋषिः, किं छन्द इति नैगमपरम्पराऽस्ति, वैदिको विधिः। स दुर्गासप्तशत्या-श्चरित्रयोः (प्रथमचरित्रे, मध्यमचरित्रे, उत्तम चरित्रे च) स्पष्टमुच्चार्यते। निगमागमयोरयं समन्वयः प्रत्यक्षं परिलक्ष्यते। एतस्यापरं प्रमाणमस्मिन् पाठविधिपुस्तके प्राप्यते-गायत्री-मन्त्रेण न्यासविधानं दृष्ट्वा।

संस्कृते निबद्धमिदं दुर्गासप्तशतीपाठविधिसूचकं संक्षिप्तं पुस्तकं सप्तशतीहृदयरहस्यमिति शीर्षकेण लेखकस्य सुतेन डॉ. चमनलाल रैना वर्येण सम्पादितः, अजमेरनगरात् प्रकाशितश्च। शक्तिपूजकानां सप्तशती-पाठकानां च कृते समुपकारकमिदं पुस्तकम्।

**श्रीसप्तशतीहृदयरहस्यम् लेखकः पं. राजानक-निरंजननाथ रैना, सम्पादक डॉ. चमनलाल रैना, प्रकाशकः डॉ. अभिनव कमल रैना 2 ख 19 शास्त्री नगर, अजमेर, पृ. सं. 38 मूल्य 50/-.**

## ''दलितसाहित्यस्य'' संस्कृते प्रस्तुतिः

विदन्त्येव प्रबुद्धाः पाठका यदेषु दिवसेषु भारते विभिन्नासु भारतीयभाषासु ''दलित साहित्य'' नाम्ना साहित्यसर्जनस्यैका धारा सुप्रचलिताऽस्ति। समाजस्य नात्युन्नतानां वर्गाणां कृते सोऽयं शब्दः (दलित) प्रचलितोऽस्ति। संस्कृत वाङ्मये तु न कदाऽप्ययं शब्द एतस्मिन्नर्थे प्रयुक्तोऽभूत्। चातुर्वर्ण्ये सर्वविधा वर्गा अभूवन्। कतिपये ''उन्नताः'' कतिपये न तथोन्नताः। कस्मिंश्चन काले ''अस्पृश्यता'' या अवधारणाऽपि जनिं लेभे यस्या आधारो मानववर्गाधारितो नाऽभूत्, वैज्ञानिकोऽभूदिति मया बहुधा स्पष्टीकृतम्। मध्यकाले कलङ्कभूता रूढयोऽवश्यं समुदभवन्। दलितवर्गोन्नयनस्य यदान्दोलनं प्राचलत् तेन संस्कृतवाङ्मये शम्बूक-स्योदाहरणं प्रस्तूय ''सवर्णानां'' विरुद्धः कश्चन ''दलित'' वर्ग उपकल्पितः। संस्कृतमनीषिभिः स्पष्टीकरणान्यपि प्रास्तूयन्त यत्प्राचीने कालेऽभूवन् पश्चात्पदा अपि वर्गाः किन्तु तेषामपि योग्या व्यक्तयः सम्मानमलभन्त यथा सत्यकाम जाबाल, महीदास ऐतरेय-शबरी, शमुहराज निषाद-एकलव्यप्रभृतयः।

आन्दोलनस्यास्य ध्वनिः संस्कृतक्षेत्रेणाऽपि श्रुता अभूत्। आन्दोलनस्यास्य स्रोतो विभूतिरूपो महामनीषी डॉ. भीमराव रामजी आम्बेडकरः संस्कृत मनीषी, संस्कृतसमर्थकश्चाभूदेव। तेन संस्कृतभाषा न कदापि भेदभावनयाक्षिप्ता। परवर्तिनि काले दलितसाहित्य-स्यान्दोलनं मराठीभाषासाहित्ये सर्वप्रथमं जृम्भितमभूत्। अन्यासु भाषास्वपि शब्दोऽयं प्राविशत्। दलितसाहित्य-प्रतिनिधीनि पत्राणि (शम्बूक प्रभृतीनि), ग्रन्थाश्च प्रकाशिषत। गुजराती-हिन्दी-पंजाबी प्रभृतिभाषास्वपि ''दलितसाहित्यं'' सृष्टं कविभिः कथाकारादिभिश्च। संस्कृतं नवीना भाषाऽप्यस्ति, प्राचीनाऽपि। अतः संस्कृते किमिति न स्यात् तादृशस्य साहित्यस्य सृष्टिः? एनमेव विषयं मूर्तिमन्तं विदधत् कवितासङ्कलनमेकं सपद्येव प्रकाशमायातमिति ज्ञात्वा सरोमहर्षं प्रसीदेयुः संस्कृत-सेवकाः।

सङ्कलनमिदमस्ति विविधभाषाभ्य: संस्कृतेऽनूदितानां ''दलित'' विमर्शपराणां काव्यरचनानामनुवादस्य। गुजराती-हिन्दी-मराठी-असमिया-पंजाबी-बंगला-भाषाषट्कस्य प्रसिद्धानां कवीनां दलित साहित्य-प्रतिनिधिकवितानां संस्कृतेऽनुवादोऽत्र संगृहीत:। कतिपयकविता मूलत: संस्कृतेऽपि सन्ति ता अप्युद्धृता:। अहमदाबादे 'गुजराती दलित साहित्य अकादमी' एका स्थापिताऽस्ति यया पुस्तकमिदं प्रकाशितमिति सूचनाऽपि विस्माययेत् प्रसादयेच्च संस्कृतज्ञान्। अत्र यशवन्त-वाघेला-जयन्त परमार प्रभृतीनां 14 गुर्जरकवीनां, मोहनदासनैमिषराय प्रभृतीनां 15 हिन्दी कवीनां, एकस्य मराठीकवे:, द्वयो: असमीयकव्यो:, एकैकस्य च पंजाबी बांगलाकवे रचनाश्छन्दोमुक्ते संस्कृतेऽनूदिता: सन्ति, संस्कृतस्य कविताचतुष्टयमपि पर्यन्ते संगृहीतं छन्दोमुक्तशैल्याम्।इत्थं 36 कवय: प्रतिनिहिता:।

''सूर्यगेहे तमिस्रा'' शीर्षकस्यास्य काव्यरचना-संग्रहस्यानुवादक: सम्पादकश्चाऽस्ति डॉ. ऋषिराज जानी। अहमदाबादस्यायं प्रतिभाशाली संस्कृतकवि: कथाकारश्च सुविदितस्य कवे: डॉ. हर्षदेवमाधवस्य तनूज:, संस्कृतक्षेत्रेऽपि सुपरिचितोऽस्ति सम्प्रत्ययम्। सुतरां नूतनोऽयं ''क्रान्तिकारी'' प्रयास: संस्कृतसाहित्ये नूतनां दिशं प्रतिनिदधातीति स्पष्टमनुभवेयु: सुविज्ञा:। संस्कृते लिखितायां भूमिकायां स्पष्टीकृतं डॉ. ऋषिराज जानीवर्येण यत् संस्कृते नाऽभूत् कदापीदृशो ''भेदभाव:'' यस्य कारणादान्दोलनानि प्राचलन् भारते गतेषु दशकेषु। पश्चाद्वर्तिवर्गेभ्योऽपि जना आदरमलभन्त किन्तु गते कालखण्डे ब्राह्मणानां भाषारूपेण संस्कृतस्य ''मनुवादि'' रूपेण च ''सवर्णानां'' यद् वर्णनं राजनेतृभि: कृतं तस्य कारणात् वर्गभेद: समजायत। अद्य तु ''वोटभिक्षा'' वशात् जातिवादस्यान्यविधमेव स्वरूपं प्रत्यक्षमवलोक्यते, ''आरक्षण'' धाराऽन्यदेव दृश्यं प्रस्तौति, तस्या विरोधोऽप्यन्यादृशं दृश्यं प्रस्तौति, इति क: किं शक्नोति वक्तुम् ! अस्तु।

सूर्यस्य गेहेऽपि तमिस्रा एवमेव प्रसरतीति मन्तव्यं प्रस्तुवदस्य पुस्तकस्य शीर्षकमप्याकर्षकं चमत्कारकं चाऽस्ति, काव्यरचनानामनुवादोऽपि विभिन्नभाषाणां साहित्ये कीदृशं चिन्तनं प्रसरतीत्यस्य सम्यग् द्योतकोऽस्ति। पर्यन्ते हिन्द्यां ''गुजराती दलित कविता: उद्भव एवं विकास'' शीर्षको लेखकत्रयलिखितो लेखो दलितविमर्शान्दोलनस्येतिहासं प्रस्तौति। संस्कृतसाहित्ये सुतरामक्षुण्णपूर्वस्यास्य विषयस्य विस्तृतं चित्रं प्रस्तुवन्नयं ग्रन्थ: स्पष्टमेव स्वागतमर्हति।

**सूर्यगेहे तमिस्रा: अनुवादक: सम्पादकश्च डॉ. ऋषिराज जानी प्रका. गुजराती दलित साहित्य अकादमी, 7 दुर्गाकृपा सोसाइटी, चाँदखेडा, अहमदाबाद पृ.सं. 142, मूल्य 200/-.**

## शोधपत्रिका प्रारब्धा

नवदेहलीत: षाण्मासिकी ''सन्दर्भित'' शोध-पत्रिकैषा प्रारब्धाऽस्ति यस्या: प्रवेशाङ्क: सपद्येव समधिगत:। सोऽयं जुलाई-दिसम्बर 2018 कालावधे: सूचित:। पत्रिकैषा प्रमुखत: प्राकृत-अपभ्रंश भाषा जैनविद्या-भारतीयविद्याविषयाणां शोधलेखान् प्रकाशयिष्यतीति सूचितमत्र। अभिधानमस्या: प्राकृतभाषानिष्ठमस्ति ''संलेहणा'' (संलेखना) इति। सम्पादकोऽस्या अस्ति प्रो. सुदीपकुमार जैन:। विद्वद्वर्योऽयं राष्ट्रपतिसम्मानित: श्रीलालबहादुरशास्त्रि-राष्ट्रियसंस्कृतविद्यापीठे दिल्लीस्थे प्राकृतविद्याविभाग-

स्याचार्यश्च। प्रवेशाङ्केऽस्मिन् एको लेखः संस्कृते, लेखद्वयमाङ्गलभाषायाम्, अष्टौ लेखाश्च हिन्दीभाषायां मुद्रिता येषां विषयास्त एव सूचिता उपरि। एका कविता प्राकृतभाषायामस्ति।

लेखेषु कतिपये सुविख्याताना विभूतीनां, दिवङ्गतानां मनीषिणां चापि सन्ति येषां महत्त्वमवगत्य सम्पादकवर्येण समावेशिताः स्युस्ते यथा ''प्राकृतभाषा और भगवान् महावीर''शीर्षको लेखो भारतराष्ट्रपतेः डॉ. राजेन्द्रप्रसादस्य, महावीर की जन्मभूमि वैशाली का प्रजातन्त्र शीर्षको लेखः स्वः महापण्डित राहुल सांकृत्यायनस्य, ''थ्योरी ऑफ काव्य पद'' शीर्षक आङ्गलभाषाबद्धो लेखः स्व. डॉ. रामचन्द्र द्विवेदिनः, इमे विविधेभ्यः स्रोतोभ्य उद्धृताः सन्ति।

पत्रिकाया अस्या दीर्घमायुषं यशोवृद्धिं च कामयामहे।

**संलेहणाः सम्पादकः प्रो. सुदीप कुमार जैन, प्रका. महावीर परमार्थ फाउंडेशन, बी 32 छतरपुर एक्सटेंशन, नई दिल्ली, अंकस्यास्य पृष्ठ सं. 112, मू. 100/- पत्रिकाया वार्षिकसदस्यता 150/- त्रैवार्षिक 400/- पञ्चवर्षीय 600/-.**

---

# सूक्ति-सुधा

**❑ डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्यः**

**( 15 वीं.श. आचार्य सकलकीर्ति रचित सुभाषित रत्नावलीतः )**

**स्तोकं दानं सुपात्राय दत्तं भूरिगुणं भवेत्।**
**वटबीजं यथा क्षेत्रे तस्माद् देयं विवेकिभिः।।**

– जैसे योग्य क्षेत्र में बोया हुआ वट का बीज बहुत लाभ दायी होता है, वैसे ही विवेकीजनों द्वारा सुपात्र को दिया गया थोड़ा दान भी फलदायी होता है।

**दृष्टिहीनोऽपि वारैकं पात्रदानं करोति यः।**
**योगभूमौ समुत्पद्य सोऽपि याति सुरालयम्।।**

– जो मनुष्य दृष्टि हीन होने पर भी एक बार पात्रदान करता है, वह भी योगभूमि में उत्पन्न होकर स्वर्ग को प्राप्त होता है।

**पात्रदानेन सद्दृष्टिः स्वर्गं गत्वापि तत्सुखम्।**
**चिरं भुक्त्वा सुराज्यं च पश्चाद् गच्छति निर्वृतिम्।।**

– सम्यक् दृष्टि मनुष्य पात्र दान से स्वर्ग जाकर वहां के सुख को भोग कर चिरकाल तक उत्तम राज्य को पाकर पश्चाद् मोक्ष को प्राप्त होता है।

**स्वातिनक्षत्रजं नीरं शुक्तिकायां च मौक्तिकम्।**
**विषं सर्पमुखे यद्वद् दानं तद्वद् बुधैः स्मृतम्।।**

– जैसे स्वाति नक्षत्र में उत्पन्न पानी सीप में पहुंच कर मोती बन जाता है और सर्प के मुख में विष बन जाता है वैसे ही दान भी विद्वानों द्वारा जानना चाहिए।

**मेघनीरं यथा भूमिमिक्षुनिम्बादिकं भवेत्।**
**प्राप्य दानं तथा ज्ञेयं पात्रापात्रेषु योजितम्।।**

– जैसे मेघ का जल भूमि के अनुसार ईख तथा नीम आदि हो जाता है, वैसे ही पात्र और अपात्र में दिया गया दान जानना चाहिये।

**22, श्रीजीनगर, दुर्गापुरा, जयपुर**

श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने-

**सप्तत्रिंशः प्रसङ्गः**

# प्रभावकारिणी घटना

**( गताङ्कादग्रे )**

❑ **वेणीमाधव गो. धर्माधिकारी**

गृहं सम्प्राप्तस्तदा तत्रापि मम कृते तदेवोष्णं वायुमण्डलमासीत्। गृहे पार्श्ववर्तिषु च जनेषु सहपाठिभिः अद्यतनीया घटना वर्णितासीत्। यं प्रति दृष्टिर्गच्छेत् स एव मामङ्गुलिं दर्शयन्नवलोक्यतेस्म। पार्श्ववर्तिनो जना अपि गृहेभ्यो निस्सृत्य संहता अभूवन्। सर्वेषामेकमेव कथनमासीद्, अद्य मया गुरोरपमानः कृत इति न समीचीनम्। अतीवाभिलाषासीन्न केनापि वदेयं न च मिलेयम्, परं किं करवाणि अहं बाल आसम् सर्वेषामुपदेशाः श्रोतव्या एव। होराद्वयं चतुष्टयं वा कीदृश्यां मनःस्थितौ स्थित इति वर्णनमसम्भवमेव।

तदनन्तरं समग्रायां घटनायां विचारमकरवम्। मया विचारितं विद्यालयावकाशानन्तरमेवाहं बाष्पयान विश्रामस्थले गमिष्यमाण आसम् अत्र तु न मे काचित् त्रुटिः। आम् प्रधानाध्यापकोऽवश्यं धूर्ततया पाठनसमयं संवर्द्ध्यास्मानवारोधयत्। प्रधानाध्यापकस्यैतेन शासेनैवैतादृशो भयङ्करोऽपमानः संजातः। मह्यमतीव ग्लानिरभवत्। विचारिमस्य प्रतीकारः करणीयः परं प्रतीकारस्य मार्ग एव नासीत्। अन्ते चाहं स्वोपर्येव कुपितः। मया स्वं धिक्कुर्वता कथितम्, एतादृशेन दुर्बलेन मनसा किमन्यत्कर्त्तुं शक्यं स्यात्। साहसेन विना देशसेवायाः किमपि कार्यं कर्त्तुं न शक्यते। ये जनाः देशसेवां कुर्वन्ति ते संकटान् कण्ठे धारयन्ति, सहन्ते तत एवाग्रे गच्छन्ते परं न मयि तादृशी पात्रता। अहं निराशः सम भवम्। मनसि वारं-वारं विचारः समायातिस्म देशसेवार्थं साहसस्य, दृढनिश्चयस्य शक्तेश्चावश्यकतास्ति। एवं च घटनयानया मह्यं देशसेवार्थं सत्यमार्गस्य प्रदर्शनें कारितम्।

अद्य यदाऽहं पृष्ठतोऽवलोयामि भासते इदं यत् समाजकार्यार्थं विचारैः सहाचरणार्थं मे पादनिक्षेपः तस्मादेव दिनादभूत्। अद्य चिन्तयामि अतीव श्रेष्ठमेवेदमभवद् यत्तस्मिन् दिने इयं घटना घटिता। यद्ययं कठोर आघातो न स्यात् तदातु संभवतोऽस्मिन् मार्गे संवर्द्धनं नैव स्यात्।

अत एवाद्याहं विचारयामि मम स्वप्रधानाध्यापकं प्रति कोप उचितो नासीत्। कारणं तदा तैर्विद्यालयाद् बाष्पयानविश्रामस्थलं गन्तुमहमवरुद्धः, तदा तेषां तु किमपि स्वार्थं नासीदेव। यादृशी यावती च तेषां मतिरासीद्, यादृशं किंचित्सामाजिकं राजनैतिकं च जीवनं तैरनुभूतं भविष्यस्य च यावती कल्पना तैः कर्त्तुं शक्या तदनुसारमेव विद्यार्थिनो मे कल्याणस्य विचारस्तैः कृतः। विचारयामि यदि सत्यमेव तस्मिन् दिने तैर्मेऽवरोधो न कृतः स्यात् सरलतयैव चाहमनुमतः स्यां गन्तुं तदान्य सहस्त्रजनैरिव मयापि लोकमान्यतिलकस्य दर्शनं कृतं स्यात् भाषणं श्रुत्वा तलिकावादने कृतं स्यात् पुनश्च गृहे परावर्त्त्य स्वसीमिते व्यक्तिगते जीवने स्थातुं विवशतानुभूता स्यात। अन्यजनैरिव मयापि विचारितं स्याद् देशकार्यं कर्त्तुं दायित्वं केषांचन मेव शेषाः सर्वेऽपि तेषां प्रशंसां कुर्वन्तः स्वगृहे वसेयुः। पुनश्चेदमपि सत्यमासीद् यन्नयानुसारं मयि तदा लोकामन्यतिलकस्य भाषणसारमवगन्तुं मतिरपि नासीत्, केवलं कौतूहलशान्तिरेवस्यात्।

अत एवाद्य यदा विचारयामि तदा स्वादरणीयं प्रधानाध्यापकं प्रति मेऽन्तःकरणं कृतज्ञतया पूरितं भवति। तेषां कठोरकृपावशादेव मम हृदये राष्ट्रसेवायाः विचाराणां मन्थनमजायत। तेषां व्यङ्ग्यबाणा एव मे कोमलं हठशीलं चान्तर्हृदयमेतावद् गम्भीरं निचख्नुः यन्मम विचारपङ्क्तौ अन्तःप्रविश्यावलोकने सरलता संजाता। इत्यलम्।

**ब्रह्मपुरी, जयपुरम्**

# पश्चात्तापः

❑ श्रीमती आराधना धर्माधिकारी

एका महिला जयपुरनगरात्स्वर्णाभूषणापणादेकं मुक्ता मण्यादिरत्नजटितं स्वर्णहारं क्रीतवती। हारोऽयम-तीव मनोहरस्तस्यै चातितरां रोचतेस्म। अद्यापि स न महार्हस्तथाप्याकर्षक आसीत्। तस्याः गेहे पूजानाम्नी दासिका कार्यं करोति स्म। हारं दृष्ट्वा सापि विस्मिताऽऽसीत्। यदा कदा सापि मंचस्थं तं हारमादाय स्वशरीरे संयोज्य स्वात्मानं दर्पणे पश्यति स्म। कदाचित्सा पृष्टवत्यपि हारः कुत आनीतः किं मूल्यम्। अहमप्येतादृशं हारं क्रेष्यामीति।

अथ कदाचित्स हारो गृहाद् विलुप्तः। सा महिला सर्वस्मिन् गेहे तस्यान्वेषणमकरोत्। वारं वारं वस्तून्युत्था-प्य पश्यतिस्म। यतो यत्रकुत्रचित्संस्थाप्य विस्मरणस्यापि तस्याः स्वभाव आसीत्। एवं च सा अन्वेष्यान्वेष्य परिश्रान्ता परं हारो न सम्प्राप्तः। तस्याः सन्देहपरिधौ दासी पूजैवासीत्। परं विना प्रमाणं तां कथं पृच्छेत् यदा सा सर्वत्रैवान्वेषणं कृत्वा परिश्रान्ता तदा साहसमवधार्य तामेवापृच्छत् पूजे हारो न मिलति त्वया दृष्टः किम्? नेत्राभ्यामश्रूणि वर्षयन् तया कथितम् भवति। वयं दीनाः अर्थहीना अवश्यम्, परं सदाचारधनाः शीलवन्तः। हारो भवत्यैव कुत्रचित् स्थापितो भवेत्। तया कथितं मया सर्वत्रान्वेषणं कृतम्-परं हारो न मिलितः। तुभ्यमपि तु रोचते स्म सः। सा विमना भूत्वा किञ्चिदप्युत्तरमददात्।

महिलायाः कन्या बहिः पठनं कुर्वन्ती छात्रावास-वासिन्यासीत्। श्रेष्ठाङ्कैरुत्तीर्णत्वाद् विश्वविद्यालयेन सा पुरस्कारेण सम्मानिता। तच्चित्रं तया चलदूरभाषयन्त्रे मात्रे प्रेषितम्। सहसैव सा हारधारिणीं कन्यां दृष्ट्वा विस्मिता। सहैव समाचार आसीत् मातः। मे सम्मानो भवितेति समारोहे हारं धारयित्वा गमनोत्सुकतया मया हारोऽत्रानीतः। शीघ्रतावशादनुमतिरपि न गृहीतेति क्षमस्व माम्। अधुना सा पूजासंमुखेऽतितरां लघ्वी संजाता। महत्पश्चात्तापस्तस्यै समभवत्। सन्देहपरिधौ दीना अर्थहीना एवायान्ति परं प्रमाणं विनाऽऽरोपो नोचितः।

218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्

नूतनकाव्यपृषताः

# कविः ( गज़लकाव्यम् )

❑ डॉ. हर्षदेवमाधवः

**स्वव्यथां मौनं कदाचिद् गातुकामोऽस्ति कविः।**
**सृष्टिमौनं खण्डितुं हि वक्तुकामोऽस्ति कविः।**
**दीपहस्तो याति लोके ध्वान्तग्रस्ते नश्वरे।**
**भास्वरं विश्वं स्वयं निर्मातुकामोऽस्ति कविः।।**
**श्रावयन् काले स्वशब्दैः शाश्वतं सत्यं निजम्।**
**विश्वमञ्चात् लीलया प्रस्थातुकामोऽस्ति कविः।।**
**वीक्ष्य विवरैराहतं सन्त्रस्तपृथ्व्या गात्रकम्।**
**शान्तिमन्त्रैः सौख्यदैः सन्धातुकामोऽस्ति कविः।।**
**धारयन् हालाहलं कण्ठे भ्रमत्यवधूतवत्।**
**अमृतं सृष्टेरुदारः पातुकामोऽस्ति कविः।।**

8, राजतिलक बंग्लोज, आबादनगरम्,
बसस्टोप के पास, बोपल, अहमदाबाद-380058

बालोपयोगिनी जीवनवृत्तमाला

# भारतभूम्याः विभूतयः

❑ अविनाश शर्मा

## वेदव्यासः

वेदव्यासः पराशरात् सत्यवत्यां जातः। यमुनाद्वीपे प्रादुर्भावात् द्वैपायन इति नाम्ना एषः प्रख्यातोऽभूत्। सात्यवतः, पाराशरः, सत्यवतीसुतः, बादरायणः, कृष्णद्वैपायनः, पाराशर्य्यः इति नामभिः व्यासस्य सर्वत्र उल्लेखो मिलति। व्यासस्य विषये महाभारते यथा-

यो व्यस्य वेदांश्चतुरस्तपसा भगवानृषिः।
लोके व्यासत्वमापेदे कार्ष्णात् कृष्णत्वमेव च।।

यः भगवान् ऋषिः तपसा वेदान् व्यस्य लोके व्यासत्वम् कार्ष्णात् कृष्णत्वमेव आपेदे।

प्रतिमन्वन्तरं भगवान् विष्णुः व्यासत्वेनावतीर्य वेदानामुद्धारं करोति। अतः अद्य यावत् अष्टाविंशतिसंख्यकाः व्यासावताराः बभूवुः। प्रचलिते वैवस्वतमन्वन्तरे कृष्णद्वैपायनाख्यस्य व्यासस्यावतारः संजातः।व्यासः सप्तदशपुराणानि विरच्य संतुष्टो नाऽभूत्। तदनन्तरं नारदऋषेः आदेशादनेन श्रीमद्भागवतपुराणं विरचितम्। अनेन स समाधानं प्राप्तवान्।

पैलः वैशम्पायनः जैमिनिः सुमन्तुश्च इमे चत्वारः प्रधानाः शिष्याः क्रमेण ऋग्यजुः सामाथर्वणवेदान् व्यासादधीतवन्तः।एभिः शिष्यैः विभिन्नासु शाखासु वेदानां विस्तारः कृतः। उपनिषदां रहस्यं ब्रह्मसूत्रेषु व्यासेन लिखितम्। श्रीमद्भिराद्यशङ्कराचार्यप्रभृतिभिराचार्यैः ब्रह्मसूत्रस्योपरि विद्वत्तापूर्णा भाष्यग्रन्था लिखिताः। महाभारतस्य प्रथमं संस्करणं 'जय' इति नाम्ना आसीत्। तस्य लेखकोऽपि भगवान् व्यास एवाऽस्ति। अस्य महाग्रन्थस्यैव कारणात् अस्य 'व्यासोच्छिष्टं जगत्सर्वम्' इति प्रसिद्धिरभूत्।

व्यासपूजायाः आषढशुक्लापूर्णिमादिनं मन्यते। तस्मिन् दिने जनाः व्यासपूजां गुरुपूजां च कुर्वन्ति। जना अस्य महाभागस्य महिमानं निम्नश्लोकेन प्रकटयन्ति।

अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः।
अभाललोचनः शम्भुर्भगवान् बादरायणः।।

## वेदव्यास ( हिन्दी में )

वेदव्यास पराशर द्वारा सत्यवती से उत्पन्न हुए थे। यमुना द्वीप में प्रादुर्भाव होने से द्वैपायन इस नाम से ये प्रख्यात थे। सात्यवत् पाराशर, सत्यवतीसुत, बादरायण, कृष्णाद्वैपायन, पाराशर्य्य इन नामों से व्यास का सर्वत्र उल्लेख मिलता है। व्यास के विषय में महाभारत में कहा है।

जिन भगवान् ऋषि ने तपश्चर्या द्वारा वेदों का विभाग कर संसार में व्यासत्व को और कृष्णत्व के कारण कृष्णता को प्राप्त किया।

प्रत्येक मन्वन्तर के पश्चात् भगवान् विष्णु व्यास के रूप में अवतरित होकर वेदों का उद्धार करते हैं। अतः आज तक अठाईस संख्या में व्यासावतार हो गए हैं। वर्तमान वैवस्वत मन्वन्तर में कृष्णद्वैपायन नाम के व्यास का अवतार हुआ है। व्यास ने सत्रह पुराणों की रचना की

पर सन्तुष्ट नहीं हुए। तदनन्तर नारद ऋषि के आदेश से श्रीमद्भागवत नाम के पुराण की रचना की। इससे उनका समाधान हुआ।

पैल, वैशम्पायन जैमिनि सुमन्तु इन चार प्रधान शिष्यों ने क्रमश: ऋग्वेद यजुर्वेद सामवेद तथाअथर्ववेद व्यास से पढ़े। इन शिष्यों ने विभिन्न शाखाओं में वेदों का विस्तार किया। उपनिषदों का रहस्य ब्रह्मसूत्रों में व्यास ने लिखा है। श्रीमान् आद्यशङ्कराचार्य प्रभृति आचार्यों द्वारा ब्रह्मसूत्र के ऊपर विद्वन्तापूर्ण भाष्यग्रन्थ लिखे गये हैं। महाभारत का प्रथम संस्करण 'जय' इस नाम से विख्यात था। उसके लेखक भी भगवान् व्यास ही हैं। इस महाग्रन्थ के ही कारण से 'संसार का सारा साहित्य व्यास का उच्छिष्ट है' यह प्रसिद्धि हुई।

व्यास पूजा का दिन आषाढ शुक्ला पूर्णिमा माना जाना है। उसी दिन लोग व्यास पूजा ओर गुरुपूजा करते हैं। लोग इन महाभाग की महिमा निम्न श्लोक द्वारा प्रगट करते हैं।

''भगवान् बादरायण (व्यास) बिना चार मुखों के ब्रह्मा, दो बाहु होते हुए भी विष्णु और मस्तक पर तीसरा नेत्र न होने पर भी शिव हैं। इति।

**किशनपोल बाजारः, जयपुरम्**

समस्त देशवासियों को एवं सभी पाठकों को दीपावली
की हार्दिक शुभकामनाऐं






के. के. गोयल

K. K. FINANCE

33, उदयपुरिया बाजार, पाली-मारवाड़

भारती के सभी पाठकों को दीपावली
की हार्दिक शुभकामनाऐं

राकेश कुमार खण्डेलवाल
9829060582
राजेन्द्र कुमार खण्डेलवाल
9829060317



रामअवतार खण्डेलवाल
9829064377
श्यामसुन्दर खण्डेलवाल
9829044661

रामेश्वर खण्डेलवाल 9829056741
20-21, जय जवान कॉलोनी, टोंक रोड़, जयपुर

# अव्ययीभावस्थपङ्क्तिविमर्शः

❑ कृष्णदेवशुक्लः

सिद्धान्तकौमुद्यां सर्वेषु प्रकरणेषु अनेकाः पङ्क्तयः विद्यमानाः सन्ति याः तत्रत्यं पदार्थं स्फोरयन्ति एवमेव अव्ययीभावसमासप्रकरणेऽपि अनेकाः पङ्क्तयः समागताः सन्ति तेषां क्रमेणेह विमर्शः क्रियते-

**''योगविभागस्य इष्टसिद्ध्यर्थत्वात् कतिपयतिङन्तोत्तरपदोऽयं समासः''**[1] -

अस्यां पङ्क्तौ तिङन्तोत्तरपदसमासविधानस्य उपक्रमः वरीवर्तीति यथा पङ्क्तौ लिखितं वर्त्तते कतिपयतिङन्तोत्तरपदसमासः अस्य भवति विग्रहः ''कतिपयानि तिङन्तानि उत्तरपदानि यस्य'' इति। समासविधायकं सूत्रं, तस्य योगविभागः क्रियते ''सह'' इति एकं सूत्रं ''सुपा'' इति द्वितीयं सूत्रम्। अधिकारवशात् ''प्राक्कडारात्समासः''[2] तथा च ''सुबामसन्त्रिते पराङ्गवत् स्वरे''[3] इत्याभ्यां सूत्राभ्याम् अनुवृत्तिं कृत्वा एकवाक्यता सम्पाद्यते। अनन्तरं तदन्तविधित्वात् सुबन्तमित्यर्थः आयाति सूत्रार्थो भवति ''सुबन्तं सुबन्तेन सह समस्यते''। विभक्तस्य ''सह'' इति सूत्रस्य अर्थो भवति ''सुबन्तं समर्थेन सह समस्यते''। वस्तुतः अयं विभागः दैविकपदानां सिद्धये कृतोऽस्ति, अतएव वृत्तौ लिखितं ''स च छन्दस्येव''। वेदे तावत् बहुत्र सुबन्तस्य तिङन्तेन सह समासो वर्त्तते तदर्थमेव पाणिनिविरचितसूत्रे योगविभागं कृत्वा तेषां शब्दानां साधनं करोति श्रीदीक्षितः। अत्रोदाहरणानि प्रदत्तानि सन्ति ''पर्यभूषयत्'' ''अनुव्यचलत्'' इति। एवञ्च योगविभागस्य इष्टसिद्धिरपि कतिपयतिङन्तोत्तर-पदसमासादेव भवति, अतः तिङन्तोत्तरपदानां समासः विधीयते अनेन विभागेन।

अस्याः पङ्क्तेः विषये प्रौढमनोरमायां लिखति श्रीदीक्षितः ''यद्यपि उदात्तवता गतिमता च तिङा गते समासो नित्याधिकारो वार्त्तिककृतोक्तः तथापि नासौ नियतः ''य आनयत्'' ''अभि प्रभरधृषत'' इत्यादौ समासादर्शनात्''[4] इति। अत्र नित्याधिकारे इत्यस्य तात्पर्यमस्ति- ''उपपदमतिङ्''[5] इत्यत्र तिङा समासः विहितोऽस्ति, तथापि सः समासः नियतो नास्ति यतोहि 'य आनयत्'' इत्यादौ समासो न दृश्यते, अतः समासाभावादेव नियतत्वाभावः तथा च ''य आनयत्'' इत्यादौ समासाभावादेव भाष्यकारः योगविभागं न कृतवान्। यथोत्तरमुनीनां प्रामाण्यमिति शाब्दिकनये प्रसिद्धिः। किन्तु ''अनुव्यचलदि'' त्यादिषु स्थलेषु समासस्य विधानादेव योगविभागस्य इष्टसिद्ध्यर्थत्वं भवति। एतत्सर्वं पदमञ्जर्यां स्पष्टमिति। वस्तुतः वेदे सुबन्तेन सह तिङन्तस्य समासं दृष्ट्वैव श्रीदीक्षितः योगविभागं कृतवान् तथा च ''सुबन्तं समर्थेन सह समस्यते'' इत्यर्थं कृतवान्। तत्र तिङन्तशब्दाः अपि समर्थाः भवन्ति, अतएव सुबन्तेन सह तिङन्तस्य समासो भवति। तिङन्तेन सह समासविधानादेव ''परि'' तथा च ''अभूषयत्'' इति भिन्नपदयोः समासः, तेन च अत्र यण्सन्धिं विधाय ''पर्यभूषयत्'' इत्यस्य एकपदत्वं सिद्ध्यति। एवञ्च समासादेव ''समासस्य'' इति सूत्रेण अन्तोदात्तस्वरविधानं बोभोति। एवं प्रकारेण योगविभागः इष्टसिद्धये प्रकल्पितोऽस्तीति भावः।

**''भूतपूर्वे चरट् इति निर्देशात् भूतशब्दस्य पूर्वनिपातः''**[6] -

केवलसमासस्य विधानमत्र बोभोति यतोहि उक्तं

विदुषा मध्यसिद्धान्तकौमुदीकारेण- ''विशेषसंज्ञा-विनिर्मुक्तः केवलसमासः''[7] अर्थात् यस्य समासस्य अव्ययीभावतत्पुरुषादिसंज्ञा न भवति, स केवलसमास-पदेन उच्यते एवञ्च ''सह सुपा''[8] इति सूत्रेण कृतः समासः केवलसमास इति। तस्योदाहरणे ''भूतपूर्वः'' इति प्रयोगे समासादिकार्यसम्पादनानन्तरं पूर्वनिपाताय भवति प्रश्नः- समस्तपदयोः कस्य पूर्वनिपातः? एवं प्रश्ने सति समादधाति यत्- अस्मिन् प्रयोगे भूशब्दस्यैव पूर्वनिपातः। ''भूतपूर्वे चरट्''[9] इति सूत्रे भूतशब्दस्य पूर्वनिपात-दर्शनादिति। पाणिनिकृतभूतशब्दस्य पूर्वप्रयोगादेव सिद्धं यत् भूतशब्दस्य पूर्वप्रयोगः करणीयः। न केवलम् अस्मिन्नेव सूत्रे अपितु अन्येष्वपि बहुषु सूत्रेषु पाणिनिना भूतशब्दस्य पूर्वयोगः कृतः यथा- ''पूर्वे भूतपूर्वे''[10] इत्यत्र तथा च ''गोष्ठात् खञ् भूतपूर्वे''11 इत्यादिषु सर्वत्रैव भूतशब्दस्य पूर्वप्रयोग एव विहितोऽस्ति। यद्यपि पङ्क्तौ ''भूतपूर्वे चरट्-'' इति सूत्रं स्वीकृतं तथापि इदमुपलक्षणम्। उपलक्षणस्य लक्षणमस्ति ''स्वबोध-कत्वे सति स्वेतरबोधकत्वमि''ति।

तत्र प्रौढमनोरमायां लिखति श्रीदीक्षितः- ''निर्देशादिति। अन्यथा हि प्रथमनिर्दिष्टत्वाविशेषेऽपि उपसर्जनसञ्ज्ञाया अन्वर्थत्वेन पूर्वशब्दस्यैव निपातः स्यादिति भावः ''12। यद्यपि प्रथमान्तनिर्दिष्टात्वाभावात् ''प्रथमानिर्दिष्ट समास उपसर्जनम्'' 13 इत्यनेन उपसर्जनसंज्ञा अप्राप्ता तत्फलस्वरूपं पूर्वप्रयोगोऽपि अप्राप्त एव तथापि विशेषणत्वात् उपसर्जनसंज्ञाया अन्वर्थत्वेन उपसर्गस्येव पूर्वशब्दस्य पूर्वनिपातः स्यादिति शङ्कते श्रीदीक्षितः, तद्बाधनार्थं किं वा भूतशब्दस्य पूर्वप्रयोगार्थं ज्ञापनस्य आश्रयं करोति। भगवतः पाणिनेः विभिन्नसूत्रेषु भूतशब्दस्य पूर्वनिपातात् इदं सुतरां सिद्धं यत् भूतशब्दस्यैव पूर्वनिपातः करणीयः अतः ''पूर्वं भूतः'' इति समासे अङ्गभूतस्य भूतशब्दस्यैव पूर्वनिपातः विहितोऽस्ति एवञ्च ''भूतपूर्वः'' इति प्रयोगस्य सिद्धिः भवतीति तात्पर्यम्।

**''बहुलग्रहणात् सुमद्रम् उन्मत्तगङ्गम् इत्यादौ सप्तम्याः नित्यमम्भावः''[14]**

तत्र ''तृतीयासप्तम्योर्बहुलम्'' इति सूत्रे महर्षिणा ''बहुलमि''त्यस्य ग्रहणं कृतं तेन बहुललक्षणानुसारेणैव सर्वं कार्यं भविष्यति। बहुलं नाम किम् इत्युच्यते-

**''क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः**
**क्वचिद्विभाषा क्वचिदन्यदेव।**
**विधेर्विधानं बहुधा समीक्ष्य**
**चतुर्विधं बाहुलकं वदन्ति।।''[15]**

अतः ''मद्राणां समृद्धिः'' इति ''सुमद्रं'' तथा च ''उन्मत्ता गङ्गा यस्मिन् देशे'' इति ''उन्मत्तगङ्गम्'' इत्यादिस्थलेषु बहुलग्रहणात् नित्यमेव अम्भावो भवतीतिभावः अस्य समर्थनं ''सप्तम्या ऋद्धिनदीसंख्या-व्ययेभ्यो नित्यममि'' ति वक्तव्यम् इति वार्त्तिकेनापि भवति।

**''अत्र निपातेनाभिहितेऽप्यधिकरणे वचनसामर्थ्यात् सप्तमी''[16]**

''अधिहरि'' इत्युदाहरणे प्रश्नः उत्थितो भवति यत् ''अनभिहिते''[17] इत्यधिकारबलात् ''अधि'' इति निपातेन सप्तम्यर्थस्य उक्तत्वात् कुतः सप्तमी? यतोहि व्याख्याने स्वयमेव श्रीदीक्षितः लिखति सप्तम्यर्थस्यैव द्योतकोऽधि। अर्थात् अस्मिन् उदाहरणे ''अधि'' इति निपातः सप्तम्यर्थं द्योतयति तर्हि सप्तमी कथमिति प्रश्नः? यद्यपि लौकिकविग्रहे सप्तम्यन्ततया प्रयोगः आवश्यक एव, तथापि प्रदर्शिते ''हरि ङि अधि'' अत्र

अलौकिकविग्रहे एव प्रश्नः? समादधाति यत् ''अव्ययं विभक्ति-समीप-समृद्धि-वृद्ध्यर्थाभावात्ययसम्प्रति-शब्दप्रादुर्भाव-पश्चाद्यथानुपूर्व्य-यौगपद्य-सादृश्य-सम्पत्ति-साकल्यान्त-वचनेष्वि''18 ति सूत्रे विभक्ति-ग्रहणबलादेव सप्तमी भवति। उत्तराशयो वर्त्तते-अन्यतोऽपि अन्यथापि च विभक्तिपदपदार्थलाभे विभक्तिग्रहणं ज्ञापयति विभक्त्यर्थे विद्यमानेन विभक्त्यन्तस्यैव समास इति। अन्यथा सामासिकी अर्थबोधविषयिणी च उच्छृङ्खलतैव स्यादिति निष्कर्षः।

वचनसामर्थ्यादिति प्रतीकमादाय प्रौढमनोरमायां कृतो विचारः यत्- विभक्तीत्यनेन हि ये सुबन्तेन सह समासः तद्घटकीभूतैव विभक्तिः गृह्यते सन्निधानात् तथा च तं विभक्त्यर्थमेव द्योतयति अधि इति एवञ्च विभक्त्यर्थद्योतकता अधीति उपसर्गे वर्त्तते, इदमेव तात्पर्यं साकल्येन सम्पन्नं भवति वचनसामर्थ्यादित्यस्य।

**''समया ग्रामम्, निकषा लङ्काम्, आराद्वनादित्यत्र तु नाव्ययीभावः, अभितः परितः....वा. 1442 अन्याराद् सू 595 इति द्वितीयापञ्चम्योर्विधानसामर्थ्यात्''**[19] -

कारकप्रकरणस्थं वार्त्तिकं वर्त्तते ''**अभितः परितः समयानिकषाहाप्रतियोगेऽपि**''[20] इति। वार्त्तिकमिदम् उपपदविभक्तेः विधानं करोति। उपपदविभक्तेः तात्पर्यमस्ति ''**पदमाश्रित्य जायमाना विभक्तिः उपपदविभक्तिः**'' इति। अभितः इत्यादिपदयोगे द्वितीया विभक्तिः स्यात् इति तस्य वार्त्तिकस्य अर्थः। एवञ्च ''**अन्यारादितरर्तेदिक्शब्दञ्चूत्तरपदाजाहियुक्ते**''[21] इति सूत्रेण आरादित्यादियोगे पञ्चमीविधानसामर्थ्यात् अव्ययीभावसमासो न भवति। यदि समीपार्थकाव्ययं स्वीकृत्य समासः क्रियते तर्हि द्वितीयादिविभक्तेः विधानं व्यर्थं यतोहि कृते समासे विभक्तेः लुक् भवति तेन द्वितीयादिविभक्तीनां श्रवणं न स्यात् द्वितीयादिविभक्तिः श्रूयेत इत्येतदर्थं समासनिषेधः आवश्यकः समासनिषेधश्च द्वितीयादिविधानसामर्थ्यादेव भवति। अयं निष्कर्षः - नहि निर्विभक्तिकानाम् अव्ययैः समासः तदा सविभक्तिकानामेव इति सुतरां सिद्धम्। अस्यां स्थितौ अव्ययविशेषाणां योगे विभक्तिविशेषविधानमेव सूचयति-अत्र विभक्तिविशेष एव स्यात् इति। विशेषस्य लब्धिः समासाभावे एव तथा च समासाभाव एव साधि विधानविशेषात् इति।

अस्मिन् विषये प्रौढमनोरमायां लिखति श्रीदीक्षितः यत्-द्वितीयापञ्चम्योरिति रक्षितग्रन्थे स्पष्टम् 22 एवं हि कौमुद्यां द्वितीयापञ्चम्योर्विधानं स्पष्टतया उक्तमस्ति। केचन वदन्ति यत् चैत्रस्य वनादित्यादौ सापेक्षत्वात् असमासे चरितार्थत्वात् विधानसामर्थ्यं नास्तीति। अस्य खण्डनं करोति श्रीदीक्षितः यत्- यदि अत्र समासः तर्हि अव्ययैः सह नित्यसमासस्यैव न्याय्यत्वे सति चैत्रस्येत्यादिविशेषणप्रयोगस्यैव असम्भवः। यतोहि उक्तं भाष्यकारेण ''**वृत्तस्य विशेषणयोगो न**'' इति अनेनायाति-चैत्रविशेषणयोगे समास एव नास्ति। एवञ्च यदि विशेषणयोगेऽपि समासो दृश्येत, तर्हि प्रामादिकमेवेति। शेखरेऽपि श्रीनागेशः चारितार्थ्यं खण्डयति तथा च तेनोक्तं यत्- ''समयानिकषारा-च्छब्दाः अधिकरणशक्तिप्रधाना'' इति समीपमात्रवा-चित्वाभावात् न एतैः समासः 23 अत्र स्वीकृताः यावन्तोऽपि शब्दाः वर्तन्ते ते सर्वे एव अधिकरणार्थ-प्रधानाः सन्ति तथा च अव्ययं विभक्तीति सूत्रेण समीपार्थे समासो विधीयते किन्तु एषां शब्दानाम् अर्थः ''समीपे'' इति वर्त्तते अतः समासस्यैव चर्चैव वृथेति। उपगङ्गमित्यादौ गङ्गायाः समीपमिति विग्रहः, समया

ग्राममित्यादौ तु ''ग्राममित्यादौ तु'' ग्रामस्य समीपे ''इत्येवमर्थभेदात् आचार्यद्वयकथनं समञ्जसमेव।''

**''यथार्थत्वेनैव सिद्धे पुनः सादृश्यग्रहणं गुणभूतेऽपि सादृश्ये यथास्यादित्येवमर्थम्''**[24]

**''अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभाव-पश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसाकल्यान्तवचनेषु''**[25] इति सूत्रे ''यथा'' इत्यस्य ग्रहणं वर्त्तते तस्यार्थो व्याख्यात:- ''योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि यथार्था:''[26] इति। यदि यथा शब्दस्यैव अर्थ: अस्ति सादृश्यं तर्हि पुन: सूत्रे सादृश्यग्रहणं किमर्थमिति प्रश्न:? समादधाति यत् ''**यथार्थत्वेनैव सिद्धं पुनः सादृश्यग्रहणं व्यर्थं**'' सत् ज्ञापयति यत् गुणभूतेऽपि अर्थात् यत्र सादृश्यार्थस्य अप्रधानता वर्त्तते तत्रापि समास: स्यादिति।

''अव्ययमिति'' सूत्रे ''यथा'' ''सादृश्यमि''ति पदद्वयमुपात्तमस्ति। अस्मात् सिध्यति यत् ''यथा'' शब्द: केवलं त्रिष्वर्थेषु एव विद्यमान: सन् समासयोग्य:। अस्य य: तुरीयोऽर्थ: तस्मिन् वर्त्तमानम् अन्याव्ययमेव समासयोग्यम्। अत: सादृश्यार्थकेन यथा अव्ययेन सह कस्यापि सुबन्तस्य समासो न भविष्यति। तदा प्रश्न: उत्थितो भवति किमसादृश्यार्थकोऽपि ''यथा'' शब्द:? उत्तरं वर्त्तते-सादृश्यार्थकेन सह समासाभावं सूचयति सादृश्यग्रहणमेव। तेनैव ध्वन्यते यत् असादृश्यार्थकोऽपि ''यथा'' शब्दो वर्त्तते। तदा भवति प्रश्न: - अस्य समासाय कस्य योगारम्भ: अस्य प्रश्नस्य समाधानं वर्त्तते- पाणिनिसूत्रं यथाऽसादृश्ये उदाहरणम् यथाबृद्धमिति।

**''हरेरुपमानत्वं यथा शब्दो द्योतयति, तेन सादृश्य इति वा यथार्थ इति वा प्राप्तं निषिध्यते।''**[27]

''यथाऽसादृश्ये'' इति सूत्रे यथाशब्दार्थविषये इयं पङ्क्तिः। अस्य सूत्रस्य उदाहरणे ''**यथा हरिस्तथा हर:**'' इत्यत्र तथा शब्द: कस्मिन्नर्थे अस्तीति प्रश्न:? उत्तरमुखेन समाधनं ददाति अत्र तु सादृश्येऽर्थे यथाशब्द: वर्तते, तथा च हरे: उपमानत्वं द्योतयति अतएव अव्ययं विभक्तीति सूत्रेण सादृश्ये यथार्थसादृश्ये चेति उभयस्मिन्नर्थे य: समास: सोऽत्र निषिध्यते अत्र तात्पर्यमस्ति यत् उदाहरणेऽस्मिन् प्रयुक्तो यथाशब्द: सादृश्येतरार्थे नास्तीति।

अत्र लिखति शेखरकार: द्योतयतीति प्रतीकमादाय लिखति सामान्यस्य भेदको यो विशेषस्तद्रूपे प्रकारे थालिति। ''**यद्विशेषवान् हरिः तद्विशेषवदभिन्नो हर**'' इति बोधे यत्तच्छब्दाभ्यां तयोरेकत्वावगमेऽर्थादुपमानत्व-प्रतीतेरिति भाव:[28]। यथा इत्यत्र थाल्प्रत्ययविषये लिखितवान् यत्-थाल् प्रत्यय: सामान्यस्य भेदक: य: विशेष: अर्थात् इतरघटितसामान्यात् औत्कृष्ट्यरूपविशेषं हरौ हरे च मत्वा तौ इतरेभ्यो भिद्येते। इत्थंभूत: भेदक: य: विशेष: तद्रूपे विशेषणे एव थाल्प्रत्यय: भवतीति। एवञ्च उभयो: उपमानोपमेययो: समानरूपेण विशेष: वरीवर्तीति। अतएव यद्विशेषवान् हरि: तद्विशेषवदभिन्नो हर: इति शाब्दबोध: भवति व्याख्यातं श्रीमता नागेशभट्टविदुषा।

**''अक्ष्णः परमि''ति विग्रहे समासान्तविधानसामर्थ्यादव्ययीभाव:**[29] -

मनु परमिति नाव्ययम् अत: अनव्ययत्वात् कुत: अव्ययीभावसमास इति प्रश्न:? उत्तरयति तत्र ''प्रतिपरिसमनुभ्योऽक्ष्ण:'' इत्यत्र परशब्दस्य पाठ: विद्यते, यथा च ''अव्ययीभावे शरत्प्रभृतिभ्य:'' इति सूत्रेण विहितटच्प्रत्यय एव ''**प्रतिपरिसमनुभ्योऽक्ष्णः**''

इत्यनेन भाव्यम्। यदि अव्ययीभावसमास एव न, तर्हि कुतः टज्विधानम्; एवञ्च अव्ययीभावान्ते टच्प्रत्यय-विधानं-व्यर्थं, तथा च व्यर्थीभूय ज्ञापयति यत् अनव्ययेऽपि टज्विधानसामर्थ्यात् अत्र प्रयोगे अव्ययीभाव इति। अनव्ययस्थलेऽपि अव्ययीभावसमासं ज्ञापयित्वा टज्विधानं समासाभावे स्वविषयकविधानवैयर्थ्यप्रयोज्य-सामर्थ्यं व्यनक्तीति पङ्क्त्यर्थाकूतम्।

**शोधच्छात्रः**

**ज.रा.रा.संस्कृतविश्वविद्यालयजयपुरस्य,**

**व्याख्याता, श्रीदिगम्बरजैन-**

**आचार्यसंस्कृतमहाविद्यालयसांगानेरजयपुरस्य**

1. वैयारणसिद्धान्तकौमुद्याः सह सुपा 2-1-4 इति सूत्रे
2. अष्टाध्यायी 2-1-3
3. अष्टाध्यायी 2-1-2
4. प्रौढमनोरमायां सह सुपा इति सूत्रे
5. अष्टाध्यायी 2-2-19
6. सुपो धातुप्रतिपादिकयोः 2-4-71 सिद्धान्तकौमुद्याम्।
7. मध्यसिद्धान्तकौमुद्यां समासप्रकरणारम्भे।
8. अष्टाध्यायी 2-1-4
9. अष्टाध्यायी 5-3-53
10. अष्टाध्यायी 6-2-22
11. अष्टाध्यायी 5-2-18
12. प्रौढमनोरमायाम् अव्ययीभावसमासप्रकरणे।
13. अष्टाध्यायी 1-2-43
14. तृतीयासप्तम्योर्बहुलम् 2-4-84 सिद्धान्तकौमुद्याम्।
15. सिद्धान्तकौमुद्यां सूत्रव्याख्याने।
16. तृतीयासप्तम्योर्बहुलम् 2-4-84 सिद्धान्तकौमुद्याम्।
17. अष्टाध्यायी 3-2-1
18. अष्टाध्यायी 2-1-16 सिद्धाकौमुद्यामव्ययीभाव-समासे।
19. अव्ययीभावश्च 2-4-18 सिद्धान्तकौमुद्यामव्ययी-भावसमासे।
20. उपान्वध्याङ्वसः 1-4-48 सिद्धान्तकौमुद्यां कारकप्रकरणे।
21. अष्टाध्यायी 2-3-29 सिद्धान्तकौमुद्यां कारक-प्रकरणे।
22. तत्सूत्रप्रौढमनोरमायाम्
23. तत्सूत्रलघुशब्देन्दुशेखरे
24. अव्ययीभावे चाकाले 6-3-81 सिद्धान्तकौमुद्याम-व्ययीभावसमासप्रकरणे।
25. अव्ययीभावसमासप्रकरणे।
26. अव्यय विभक्तीति सूत्रे।
27. यथाऽसादृश्ये 2-1-7 अव्ययीभावसमासप्रकरणे।
28. तत्सूत्रलघुशब्देन्दुशेखरे।
29. अव्ययीभावे शरत्प्रभृतिभ्यः।

समस्त देशवासियों को दीपावली की हार्दिक शुभकामनाऐं :-

सुरेन्द्र पारीक

(विधायक भाजपा)

हवामहल क्षेत्र जयपुर



नरेश सौंकिया (ज्वैलर्स)

नवरत्नों के विक्रेता

पन्ना रत्न के थोक विक्रेता

घाटीवाला हाउस, परतानियों का रास्ता

चौड़ा रास्ता, जयपुर

मो.: 0141-2571026, मो.: 9829057106

# ऋग्वेदीयं कल्पसाहित्यम्, तत्परिचयश्च

❑ दीपिका गौतम

ऋग्वेदीयं कल्पसाहित्यं भागचतुष्टये वर्तते विभक्तम्, श्रौत-शुल्ब-गृह्य-धर्मभेदात्। ऋग्वेद-सम्बद्धे द्वे श्रौतसूत्रे मिलत:, आश्वलायन श्रौतसूत्रं, शांखायन श्रौतसूत्रञ्च। आश्वलायन श्रौतसूत्रं द्वादशाध्यायेषु विभक्तमस्ति, अस्य वर्ण्य-विषया: सन्ति, दर्शपौर्णमास: अग्न्याधेयम् अग्निहोत्रम् पिण्डपितृयज्ञ: अन्वारम्भणी-येष्टि: आग्रयणीयेष्टि: काम्येष्टय: चातुर्मास्यादि, निरूढपशुबन्ध: प्रायश्चित्तानि ज्योतिष्टोम: सत्रम्, एकाह: अहीन: गवामयनम् इतराणि सत्रकर्माणि। श्रौतसूत्रेऽस्मिन् होतृ-मैत्रावरुण अच्छावाक गार्गदत्तत-ऋत्विजां कृत्यानि वर्णितानि सन्ति।

श्रौतसूत्रेऽस्मिन् देवस्वामिकृत भाष्यम्, नरसिंह सूनो: गार्ग्यनारायणस्य वृत्ति:, भवनाकृत व्याख्या, सिद्धान्तिभाष्यम् देवत्रात-भाष्यम्, टिप्पुभट्टस्य संग्रहण-दीपिकाव्याख्या, त्र्यम्बक विरचिता व्याख्या, षड्गुरु-शिष्यस्य अभ्युदय प्रदा टीका च प्रसिद्धा: सन्ति। गणेश सी गोखले सम्पादितं गार्ग्य-नारायण वृत्तिसहितं आनन्दाश्रमप्रेसत: (सन् 1917) प्रकाशितमस्ति आश्वलायन श्रौतसूत्रम्।

**शांखायन श्रौत सूत्रम् -**

अस्य सम्बन्ध: बाष्कल शाखया वर्तते, यतो हि अयं बाष्कल शाखाया: अन्तिमं मन्त्रं (तच्छंयोरावृणीमहे) निर्दिशति। दश अध्याया: सन्ति, येषां वर्ण्य विषया: सन्ति-

परिभाषा प्रकरणम्, दर्शपौर्णमास:, अग्न्याधेय:, पुनराधेयश्च, अग्निहोत्रम्, शेषेष्टय:, आग्रयणेष्टि:, चातुर्मास्यानि, प्रायश्चित्तानि, ब्रह्मत्वम्, पिण्डपितृयज्ञ:, शूलगवश्च, एवमेव, अग्निष्टोम: उक्थ्य: षोडशी अतिरात्रम् द्वादशाह: चतुर्विंश:, अभिप्लवषडह अभिजित् स्वरसाम, विषुवत् विश्वजितश्च सन्ति। एवमेव होत्रकानां शस्त्राणि प्रायश्चित्तानि इष्टयश्च सत्रम् गवामयनं अन्यानि अयनानि हर्विर्यज्ञ अग्न्याधेयम्, पुनराधेयम् दर्शपूर्णमासौ सव: स्तोमश्च वर्णितानि कृत्यानि। एवमेव वाजपेय: बृहस्पतिसव: सोमसंस्था: आप्तोर्याम: यमस्तोम: वाज: स्तोम: राजसूय: शुन:शेपाख्यानम् अश्वमेध:, पुरुषमेध:, सर्वमेध:, वाजपेय: अश्वमेध: अन्यानि अहीनानि महाव्रतानि च चर्चितानि सन्ति।

**टीका-सम्पदा**

वरदत्तसुत-ब्रह्मदत्तस्य आनर्तीयं भाष्यम् मिलति। नारायणकृत निरञ्जन पद्धति:, अग्निस्वामि भाष्यम्। कैलेण्ड-सम्पादितं नागपुरत: (1953 ई.) प्रकाशितम् आंग्लानुवाद सहितम्।

**आश्वलायन गृह्य सूत्रम् -**

गृह्यसूत्रमिदम् ऋग्वेदीयमस्ति। अस्य प्रचारोऽपि बाहुल्येन वर्तते। अस्मिन् चत्वार: अध्याया: सन्ति येषां विषय विवरणमित्थं वरीवर्ति-

**प्रथमेऽध्याये** - पाकयज्ञ:, सायंप्रात: सिद्धहविष्य, होमकर्म, विवाह: पार्वणस्थालीपाक: पुंसवनम्, सीमन्तोन्नयनम् जातकर्म, अन्नप्राशनम्, चौलकर्म, गोदानं, उपनयनम्, ब्रह्मचर्य व्रतानि-मधुपर्कश्च

**द्वितीयेऽध्याये** - श्रवणा, आश्वयुजी, अष्टका, वास्तुनिर्मिति: गृहप्रवेशश्च

**तृतीयेऽध्याये** - पञ्चमहायज्ञा:, ऋषितर्पणम्, वेदाध्ययनम्, उपाकर्म, समावर्तनम्, राजसन्नाहनञ्च।

**चतुर्थेऽध्याये** - दाहकर्माणि, श्राद्धकर्माणि, शूलगवश्चेति।

**टीका:** –

अस्मिन् देवस्वामिकृत भाष्यम्, नारायणकृता वृत्तिः हरदत्तस्य टीका, कुमारिल भट्टस्य कारिकाः जयन्त-स्वामिकृत विमलोदय टीका प्रसिद्धा। त्रैविद्य वृद्धकृता-प्रदीपिका टीकाऽपि वर्तते। यस्या अपरं नाम ''आड्विला'' वर्तते। हस्तलेखस्य पुष्पिकायां मिलति-

**''आश्वलायन सूत्रस्य वृत्तिरेषा प्रदीपिका।**
**कृता त्रैविद्य वृद्धेन तालवृन्त निवासिना।।''**

अस्य आनन्दाश्रम संस्करणं सुप्रसिद्धं विद्यते।

**शांखायन गृह्य सूत्रम्** –

ऋग्वेदीय शांखायन शाखा-सम्बद्धं गृह्यसूत्रं षडध्यायेषु विभक्तमस्ति। विद्वांसः साक्ष्यानुसारमस्य अर्वाचीनत्वं प्रतिपादयन्ति। अस्य विषयानुक्रमणी एवं वर्तते-

**प्रथमाध्याये** – पाकयज्ञः, दर्शपौर्णमासौ, ब्रह्मयज्ञाः, कन्यागुणाः, पाणिग्रहणम्, अश्मारोहणम्, लाजाहोमः सप्तपदी, प्रस्थानम्, पतिगृहप्रवेशनम्, ध्रुवदर्शनम्, चतुर्थीकर्म, गर्भाधानम्, पुंसवनं, सीमन्तोन्नयनम्, जातकर्म, नामकरणम्, मेधाजननम्, अन्नप्राशनम्, चूडाकर्म।

**द्वितीयेऽध्याये**– उपनयनम्, वेदाध्ययनम्, शुक्रियः, शाक्वरः, वैश्वदेवः,मधुपर्कः।

**तृतीयेऽध्याये** – समावर्तनम्, वास्तोष्पतिहोमः, आग्रयणेष्टिः अष्टका।

**चतुर्थेऽध्याये** – श्राद्धकर्म, पार्वणम्, एकोद्दिष्टम्, सपिण्डीकरणम्, उपाकरण, उत्सर्ग, स्नातकनियमाः, श्रावणहोमः, आश्वयुजी, आग्रहायणीयेष्टिः, प्रत्यवरोहणम्।

**पञ्चमाध्याये** – अग्नि समारोपणम्, तडाग कूपोद्यान-प्रतिष्ठाः प्रायश्चित्तानि।

**षष्ठेऽध्याये** – आरण्यक भागस्य अध्ययनार्थं नियमाः।

**संस्करणम्** –

(1) नारायण भाष्य सहितं रामचन्द्र कृत पद्धति सहितम् ओल्डन वर्ग सम्पादितम् 1878 ई।

(2) प. रत्नगोपाल भट्ट वाराणसी 1908 ई.।

(3) सीताराम सहगल सम्पादितं नारायण भाष्य सहितम्। आश्वलायन गृह्य कल्पस्येदं वैशिष्ट्यं वर्तते यत्तस्मिन् केवलम् एकादश संस्काराणामेव चर्चा वर्तते। सेयं चर्चा सूत्रस्यास्य प्राचीनतां प्रमाणयति। शांखायन गृह्यसूत्रस्य नैकानि सूत्राणि पारस्करगृह्यसूत्रात् समुद्धृतानि प्रतीयन्ते। अनेन सूत्रस्यास्य परवर्तित्वं स्फुटं भवति। तथापि अन्तः-परीक्षणमस्माभिः अवश्यं सम्पादनीयं येन सत्यमुद्घाटितं स्यात्।

**शोधछात्रा**
**जगद्गुरु रामानन्दाचार्य राज. संस्कृत वि.वि.**
**(जयपुरम्)**

**समस्त देशवासियों को दीपावली की हार्दिक शुभकामनाऐं**



**दामोदरदास मोदी**
**(विश्व हिन्दु परिषद्)**
**राजस्थान**
**डी-32, अहिंसा सर्किल, सी-स्कीम, जयपुर**

नारी-स्तम्भः

# प्रश्रिते दानशीले च सदैव निवसाम्यहम्

❑ डॉ. राजेश्वरी भट्ट

कार्तिकमासस्य अमावस्यातिथिः लक्ष्मीपूजा महोत्सवरूपेण राष्ट्रे परया श्रद्धया महता मोदेन च सम्मान्यते। लक्ष्मीर्धनस्याधिष्ठात्री देवी वर्तते। धनञ्च जीवनयात्रायै अनिवार्यं साधनमस्ति। धनेन विना जीवनं दुःखमयं दुर्वहञ्च भवति। लक्ष्मी देव्याः कृपादृष्टिः सुखसमृद्धिसौभाग्यविधायिनी अस्ति। अतः अर्थार्थिनः सुखार्थिनश्चत्र जना वित्त-वैभव-विलासादीनां विविधैश्वर्याणां प्राप्त्यर्थं धनदेव्याः समाराधने संलग्ना दृश्यन्ते। विशेषेण लक्ष्मीपूजा-दिवसे प्रभूतैश्वर्यकामिनो मनोवाक्कर्मभिर्धनदेवी-माराधयन्त आत्मनोऽभीष्टमधिगच्छन्ति। किन्तु दृश्यते यत् लक्ष्मीदेव्याः कृपाप्रसादेन प्रसादिता अपि तस्याः प्रकृत्याऽनभिज्ञा धनलोभलुब्धा अधिकाधिकं धनमधिगन्तुमातुराः केचिदविवेकिनो जनाः कार्यम-कार्यमविचार्य असत् कार्येषु प्रवर्तन्ते ततो निराशाग्रस्ता अचिरमेव नाशं प्राप्नुवन्ति। कथितञ्च-

आशापाशशतैर्बद्धाः कामक्रोधपरायणाः।
ईहन्ते कामभोगार्थमन्यायेनार्थ सञ्चयम्।।
गीता 16/12

तानहं द्विष्वतः क्रूरान् संसारेषु नराधमान्।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु।।
श्रीमद्भगवद्गीता 16/19

शास्त्रेषु लोभाविष्टानामविवेकिनां दुर्गत्या वर्णनं विस्तरेण प्राप्यते। लोभग्राहगस्तो धृतराष्ट्रपुत्रो दुर्योधनः सम्पूर्णराज्यस्य अर्द्धांशस्य भागिभ्यः पाण्डुपुत्रेभ्यः सूच्यग्रमात्रमपि भूमिं प्रदातुमसहमतो भूत्वा महासंग्रामस्य निमित्तो जातः परिणामतः अपरिमितं वैभवं विहाय रिक्तहस्तः परलोकं ययौ। युगयुगेभ्यो राष्ट्रगौरवभूतस्य रघुवंशस्य विनाशको धनलुब्धो दुराचारी रघुवंशीयो राजा अग्निवर्णोऽभूत्। शास्त्रैरग्रजैश्च मुहुर्मुहुर्निवार्यमाणा अपि लोभस्य दुष्परिणामेन सुपरिचिता अपि धनमनुधावन्तो जना लोभाग्नौ प्रविश्य आत्मघातं कुर्वन्ति। नित्यं समाचार-पत्रैर्दूरदर्शनमाध्यमेन परिवेशेन च चाराघोटाला-कोयलाघोटाला, बोफोर्स घोटाला, पी.एन.बी बैंक घोटाला एतदतिरिक्तं यत्र तत्र अनेकेषु विभागेषु, चिकित्सालयेषु, विद्यामन्दिरेषु किमधिकं धार्मिक संस्थास्वपि धन लाभ लुब्धा गृध्रा अकरणीयं कृत्वा दुर्गतिग्रस्ता दृश्यन्ते। लक्ष्मीः कुत्र विनाशं करोति कस्मात् स्थानात् पलायते, अस्मिन् विशदे महाभारतग्रन्थे शान्तिपर्वणि लक्ष्मीन्द्रयोर्मध्ये जातः संवादो मननीयोऽनुकरणीयो वर्तते। ज्ञायते यत् त्रिषु लोकेषु प्राणिनो दिव्यस्वरूपां लक्ष्मीं प्राप्तुं प्रयत्नवन्तो दृश्यन्ते किन्तु लक्ष्मीदेवी, सत्पक्षिणी धर्मप्रिया च वर्तते। लक्ष्मीः जिगीषूणां राज्ञां रथस्य पताकासु धर्मवतां गृहेषु-सत्पुरूषाणां हृदयेषु सत्यवादिनां मनस्सु सदाचारिषु ब्रह्मविद्सु विद्याविनयसम्पन्नेषु दानशीलेषु मनुष्येषु निवासं करोति कथितञ्च -

जितकाशिनि शूरे च संग्रामेष्वनिवर्तिनि।
निवसामि मनुष्येन्द्रे सदैव बलसूदन।।
महा, शान्तिपर्व, मोक्षधर्मपर्व 228/25

धर्मनित्ये महाबुद्धौ ब्रह्मण्ये सत्यवादिनि।
प्रश्रिते दानशीले च सदैव निवसाम्यहम्
महा, शान्तिपर्व, मोक्षधर्म पर्व 228/26

येऽपि जना दान-सत्य-धर्म-शौर्य-क्षमादिभिः सद्गुणैर्विहीनाः सन्ति तान् विहाय देवी पलायते। लक्ष्मीमहोत्सवे केवलं धूप-दीप-नैवेद्य-दक्षिणा-

**दिभिः पूजासामग्रीभिः सहैव लक्ष्मीपूजनं पर्याप्तं नास्ति अपितु लक्ष्म्या निर्दिष्टः संदेशः तस्य पालनञ्च वस्तुतो लक्ष्मीपूजायाः सार्थकताऽस्ति।**

## हिन्दी अनुवाद

कार्तिकमास की अमावस्या तिथि लक्ष्मीपूजा महोत्सवके रूप में सम्पूर्ण राष्ट्र में अत्यन्त श्रद्धा एवं हर्षोल्लास से मनाई जाती है। लक्ष्मी धन की अधिष्ठात्री देवी है। धन जीवन यात्रा निर्वाह के लिए अनिवार्य साधन है। धन के बिना जीवन दु:खमय एवं भारस्वरूप हो जाता है। लक्ष्मीदेवी की कृपा दृष्टि सुखसौभाग्य विधामिनी है। अत: सुख एवं धन की कामना से प्राणी धनदेवी की आराधना में संलग्न रहते हैं। विशेषरूप से लक्ष्मीपूजा के दिन असीमित ऐश्वर्य की कामना से युक्त मनुष्य मन, वचन तथा कर्म से धनदेवी की परम भक्ति से अपने मनोरथ को प्राप्त करते हैं। किन्तु ज्ञात होता है कि लक्ष्मी की कृपा का वरदान प्राप्तकर भी लक्ष्मी के चञ्चल स्वभाव से अनभिज्ञ धन के लोभ से ग्रसित कुछ अविवेकीजन अधिक से अधिक धन प्राप्त करने के लिए आतुर होकर सदसद् कार्यों का विचार न करते हुए असत् कार्यो में प्रवृत्त हो जाते हैं तथा निराशा प्राप्त करने पर अपना नाश स्वयं ही करते हैं। कहा भी गया है- जो सैकड़ों आशाओं के फंदों में बँधे हुए मनुष्य काम क्रोध के वशीभूत होकर विषयों का भोग करने के लिए अन्याय पूर्वक धनादि पदार्थों का संग्रह करने की चेष्टा करते है, उन पापाचारी, द्वेष करने वाले क्रूरकर्मी नराधमों को मैं बार-बार आसुरी योनियों में ही डालता हूँ।

श्रीमद्भगवद्गीता 16/12 श्रीमद्. 16/19 शास्त्रों में लोभी तथा विवेकशून्य मनुष्यों की दुर्गति का वर्णन विस्तार से किया गया है। लोभरूपीग्राह से ग्रस्त धृतराष्ट्र के पुत्र दुर्योधन ने सम्पूर्ण राज्य के आधे भाग के हकदार पाण्डुपुत्रों को सूई की नोक के बराबर भी भूमि देना अस्वीकार कर दिया। परिणामस्वरूप अपार वैभव को यहीं छोड़कर खाली हाथों से परलोक सिधार गया। युगयुगों से राष्ट्र के गौरव रघुवंश का विनाश रघुवंश के दुराचारी एवं लोभी राजा अग्निवर्ण के दुराचार के कारण ही हुआ। शास्त्रों एवं अग्रजों के द्वारा बार बार समझाए जाने पर भी लोभ के दुष्परिणामों को जानते हुए भी धन के पीछे दौडने वाले अज्ञानी जन लोभाग्नि में कूदकर अपना विनाश स्वयं ही करते हैं। नित्य ही समाचार पत्रों तथा दूरदर्शन के माध्यम से एवं परिचित परिवेश से देश में होने वाले चारा घोटाला, कोयला घोटाला, बोफोर्स घोटाला, इसके अतिरिक्त यत्र, तत्र अनेक विभागों, चिकित्साक्षेत्रों, विद्यामन्दिरों अधिक क्या कहें धार्मिक संस्थानों में भी धन के लोभ से अपराध करने वालों की दुर्गति के समाचार प्राप्त होते हैं। लक्ष्मी कहाँ निवास करती है किस स्थान से पलायन कर जाती है इस विषय में महाभारत के शान्तिपर्व में लक्ष्मी तथा इन्द्र के मध्य होने वाला संवाद मननीय एवं अनुकरणीय है। लक्ष्मी के कथन से ज्ञात होता है कि तीनों पवित्र लोकों में सभी प्राणी-दिव्य स्वरूपा लक्ष्मी को प्राप्त करने के लिए प्रयत्नशील रहते हैं। किन्तु लक्ष्मी देवी सत्यप्रिया तथा धर्मप्रिया है। लक्ष्मी विजय की कामना वाले राजाओं के रथ की पताका में धर्मशील प्राणियों के घरों में, सज्जनों के हृदय में, सत्यवादियों के मन में, सदाचारियों एवं ब्रह्मवेत्ता तथा विद्याविनय सम्पन्न व्यक्तियों में निवास एवं स्थिति करती है।

जो प्राणी दान, सत्य धर्म-वीरता-क्षमा आदि गुणों से रहित है धनदेवी उन्हें छोड़कर पलायन कर जाती है। अत: लक्ष्मीमहोत्सव पर धूप, दीप, नैवेद्य, दक्षिणा आदि सामग्रियों के साथ ही लक्ष्मी पूजन पर्याप्त नहीं है अपितु उपर्युक्त लक्ष्मी के द्वारा संदिष्ट कथन और उसका पालन ही वास्तव में लक्ष्मी पूजा की सार्थकता है।

**-सी-276, भाभा मार्ग, तिलकनगर, जयपुर**

आयुर्वेद-स्तम्भः

# दीपावल्यां धूमोपहतभेषजम्

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**पृथिव्यां सांस्कृतिकदृष्ट्या समुन्नते भारतवर्षे परम्परागतरूपेण बहुविधानां पर्वणामुत्सव-रूपेणायोजनं कुर्वन्ति धर्मद्वारावहिताः जनाः। सामान्यतया भारतवर्षे देवगोब्राह्मणाचार्य-गुरुवृद्धार्चने रताः भारतवासिनः शस्ताचाराः विशेषेण कुर्वन्ति। तस्यैव एष प्रभावो वर्तते यत् ते प्रतिदिनं पक्षे पक्षे मासे मासे प्रतिवर्षे च भिन्नभिन्नस्वरूपेण धर्मसम्मतानां पर्वणामायोजनं कुर्वन्ति। एतेषु पर्वसु दीपावलीपर्वणः आयोजनम् अधिकेनोत्साहेन कुर्वन्ति जनाः। पर्वण्यस्मिन् प्रकाशोत्सवक्रमे बहूनां दीपानां प्रज्ज्वालनं यत्र तत्र सर्वत्र कृत्वा स्वस्यात्मनः प्रकाशेन बहिर्लोके प्रकाशं कुर्वन्ति तथा बहिर्लोकस्य प्रकाशेनात्मानं प्रकाशयन्ति।**

पृथ्वी पर सांस्कृतिक दृष्टि से समुन्नत भारतवर्ष में धार्मिक लोग परम्परागत रूप से बहुत प्रकार के त्योहारों का उत्सव रूप में आयोजन करते हैं। सामान्यतया भारतवर्ष में देव, गो, ब्राह्मण, आचार्य, गुरु वृद्ध लोगों की सेवा-पूजा में संलग्न भारतवासी प्रशस्त आचरण वाले और अध्यात्मप्रवणेन्द्रिय (अध्यात्म में अनुरक्त इन्द्रियां हैं जिनकी ऐसे) होते हैं। धर्मशास्त्रों में श्रद्धा रखने वाले आस्तिक्यबुद्धि वाले धर्मभीरु लोग सदाचार का अनुसेवन (पालन) ही विशेष रूप से करते हैं। उसका ही यह प्रभाव है कि वे प्रतिदिन, प्रत्येक पक्ष, प्रत्येक माह और प्रतिवर्ष भिन्न-भिन्न रूप से धर्म सम्मस्त त्योहारों का आयोजन करते हैं। इन त्योहारों में दीपावली पर्व का आयोजन लोग अधिक उत्साह से करते हैं। इस पर्व में प्रकाशोत्सव के क्रम में बहुत से दीपकों को यहाँ वहाँ सभी जगह जलाकर अपनी आत्मा के प्रकाश से बाह्य लोक में प्रकाश करते हैं तथा बाह्य लोक के प्रकाश से अपने आपको प्रकाशित करते हैं।

**धन्वन्तरित्रयोदशीतः भ्रातृद्वितीयापर्यन्तं क्रमशः पंचपर्वणां सरणिः निरन्तरमेव सर्वान् जनानाह्लादयति। कालेऽस्मिन् स्वास्थ्यानुवर्तन-मधिकृत्यायुर्वेदसिद्धान्तानुरूपेण चिकित्सकाः स्वस्थेभ्यः जनेभ्यः विरेचनकर्मणः व्यवस्थां कुर्वन्ति। अनेन शरीरस्य शोधनं भवति। तत्पश्चादेव रसायनद्रव्याणां सेवनस्य व्यवस्थां कुर्वन्ति भिषजः। यतोहि दीपावल्यनन्तरंत्वरितमेव हेमन्तर्तोरागमनं भवति। हेमन्ते काले तु शीतानिलस्पर्शेन जनानामन्तस्थस्य जाठराग्नेरभि-वृद्धिः कालप्रभावादेव भवति। अतएव एतेषु पंचसु पर्वसु जनाः गरिष्ठानामाहारद्रव्याणां तन्निर्मितानाञ्च बहुविधानां व्यञ्जनानामुपयोगं कुर्वन्ति। पारम्परिकरूपेणैषः सांकेतिकः प्रकल्पो वर्तते। यतोहि कालादस्मादारभ्य यः जनः होलिकोत्सव-पर्यन्तं कालप्रभावादभिवृद्धे जाठराग्नौ नित्यं मात्राकालौ विचारयन् हिताभिरन्नसमिद्भिः जुहोति सः कालेऽस्मिन् कालप्रभावाज्जायमानैः दारुणै-रामयैः प्रपीडितो न भवति।**

धन्वन्तरि-त्रयोदशी से भाईदूज तक क्रमशः पांच पर्वों की शृंखला निरन्तर सभी लोगों को आह्लादित करती है। इस काल में स्वास्थ्यानुवर्तन के लिये आयुर्वेदसिद्धान्तों के अनुरूप चिकित्सक स्वस्थ लोगों के लिए विरेचन कर्म की व्यवस्था करते हैं। इससे शरीर का शोधन होता है। इसके पश्चात् ही चिकित्सक रसायन द्रव्यों के सेवन की व्यवस्था करते हैं। क्योंकि दीपावली के बाद तुरन्त ही हेमन्त ऋतु का आगमन होता है। हेमन्त ऋतु में तो शीतल वायु के स्पर्श से लोगों की अन्तःस्थ जाठराग्नि की अभिवृद्धि काल प्रभाव से ही होती है। अत एव इन पांचों त्योहारों पर लोग गरिष्ठ आहारद्रव्यों और उनसे निर्मित बहुविध व्यञ्जनों का उपयोग करते हैं। पारम्परिक रूप से यह सांकेतिक प्रकल्प है। क्योंकि जो व्यक्ति इस काल से आरम्भ करके होलिकोत्सव पर्यन्त काल के प्रभाव से अभिवृद्ध जाठराग्नि में नित्य मात्रा और काल का विचार करता हुआ हितकर अन्न का सेवन करता है वह इस काल में काल के प्रभाव से उत्पन्न होने वाली दारुण व्याधियों से पीडित नहीं होता।

**पर्वणां क्रमेऽस्मिन् प्रबुद्धाः विबुद्धा अवहिताः जनाः शरीरेन्द्रियसत्त्वात्मसंयोगात्मकस्यास्य शरीरस्याभिरक्षणार्थं नैरुज्यकर्तारं भगवन्तं धन्वन्तरिमुत्साहपूर्वकं पूजयन्ति। अकालमृत्योः वारणार्थं तत्सम्बन्धिनं देवं यमं पूजयन्ति। अनेन प्रथमायाः प्राणैषणायाः परिपालनं भवति। जीवनयापनार्थं धनस्यावश्यकता भवत्यतएव धनदेवीं लक्ष्मीं सादरं पूजयन्ति। अनेन द्वितीयायाः धनैषणायाः परिपालनं भवति। यतोहि प्राणेभ्योऽनन्तरं धनमेव पर्येष्टव्यं भवति। नहि अतः पापात् पापीयोऽस्ति यदनुपकरणस्य दीर्घमायुर्भवेत्। अतः लक्ष्मीपूजनमाध्यमेन धनैषणार्थं प्रयत्नं करिष्याम इति सङ्केतं ददति जनाः।**

त्योंहारों के इस क्रम में प्रबुद्ध (विद्वान्, जागरूक) विबुद्ध (जानने योग्य को विशेषरूप से जानने वाले, बोद्धव्यं विशेषेण बुद्धमेतैरिति विबुधाः), सावधान लोग शरीर, इन्द्रिय, सत्त्व, आत्मा के संयोगात्मक इस शरीर की रक्षा के लिए नीरोगता प्रदान करने वाले भगवान् धन्वन्तरि को उत्साह पूर्वक पूजते हैं। अकाल मृत्यु को दूर करने के लिए उससे सम्बन्धित देवता यम को पूजते हैं। इससे प्रथम प्राणैषणा का परिपालन होता है। जीवन यापन के लिए धन की आवश्यकता होती है। इसलिए ही धनदेवी लक्ष्मी को आदरपूर्वक पूजते हैं। इससे दूसरी धनैषणा का परिपालन होता है। क्योंकि प्राणों के बाद धन ही गवेषणीय होता है। निश्चय ही इससे बडा कोई पाप ही नहीं होता कि उपकरण रहित व्यक्ति दीर्घ आयु वाला होता। अतः लक्ष्मीपूजन के माध्यम से धनैषणा के लिए प्रयत्न करेंगे ऐसा लोग सङ्केत देते हैं।

**तृतीया तु एषणा परलोकैषणा भवति। अतएव-इमामेषणामधिकृत्याचार्यश्चरकः निर्दिशति यत् बुद्धिमान्नास्तिक्यबुद्धिं जह्यात् विचिकित्साञ्च। यतोहि पुनर्भवस्यास्तित्वं भवत्येव। अतएव दानतपोयज्ञसत्याहिंसाब्रह्मचर्यादीनामनुपालनं करणीयमेव। एतानि कर्माणि निःसंशयं निःश्रेयस्कराणि भवन्ति। अन्येषु धर्मशास्त्रेष्वपि परलोकैषणां मोक्षं वाधिकृत्य**

**धर्मद्वाराणामभिपालनस्य निर्देशः प्राथमिकरूपेण वर्तते। सम्भवतः अस्मादेव हि कारणात् पारम्परिकरूपेण भारतवर्षीयाः जनाः सम्पूर्णे वर्षे वारं वारं बुहविधानां पर्वणां माध्यमेन धर्ममनुसरन्ति।सत्यमनुस्मरन्ति च।**

तीसरी एषणा तो परलोकैषणा होती है। अतएव इस एषणा को लेकर आचार्य चरक निर्देश करते हैं कि बुद्धिमान् व्यक्ति नास्तिक्य बुद्धि और विचिकित्सा (सन्देह) का त्याग करें। क्योंकि पुनर्भव का अस्तित्व होता ही है। अतएव दान, तप, यज्ञ, सत्य, अहिंसा, ब्रह्मचर्य आदि का अनुपालन करना ही चाहिये। ये कर्म निःसंशय निःश्रेयस्कर होते हैं। अन्य धर्मशास्त्रों में भी परलोकैषणा या मोक्ष को अधिकृत करके धर्मद्वारों के अभिपालन का बहुत प्रकार के त्योहारों के माध्यम से (त्योहारों को मनाते हुए) धर्म का अनुसरण करते हैं और सत्य का अनुस्मरण करते हैं।

**श्रेष्ठं ह्येतद् दीपावलिपर्व वर्तते। यस्मिन् तिस्रैषणानामनुवर्तनं भवति। किन्तु दीपप्रज्वालन-यज्ञतपोदानेत्यादीनां कर्मणामनुपालनकर्तारः जनाः मदोन्मत्ताः सन्तः स्फोटकानां स्फोटन-मप्यत्युत्साहेन कुर्वन्ति। तेन सर्वत्र दूषितधूम-परिव्याप्तिर्भवति। अत्र स्फोटकानां परिवर्जन-स्यावश्यकता तु न वर्तते, किन्त्ववधानता त्वावश्यकी। यतोहि परिव्याप्तेन धूमेन पर्वसु व्यस्ताः जनाः पीडिताः भवन्ति। धूमेनोपहताः बहवः जनाः विभिन्नै रोगैर्ग्रस्ताः त्रस्ताः स्रस्ताश्च भवन्ति। तत्र स्फोटकानामपवारणं त्वसम्भवं वर्तते, किन्तु संरक्षणमथवा धूमोपहननानन्तरं तेषां लक्षणानां निवारणं त्वपेक्षितं भवति। यद्यपि संहिताकाले त्वेतादृशी स्फोटनात्मकस्य पर्वसमायोजनस्य व्यवस्था नैवासीत्। पुनरपि विभिन्नैः कारणैः परिव्याप्तेन निर्देशः कृतः, तेषां सिद्धान्तानां तदनुवर्तिनाञ्चोपक्रमाणामौषध-योगानां प्रयोगः करणीयः। अत्र संक्षेपेण तेषां निर्देशः क्रियते।**

यह दीपावली का त्योहार श्रेष्ठ है। जिसमें तीनों एषणाओं का अनुवर्तन होता है। किन्तु दीपप्रज्वालन, यज्ञ, तप, दान इत्यादि कर्मों का अनुपालन करने वाले लोग मदोन्मत्त होकर अत्युत्साह से पटाखों को फोड़ने का कार्य करते हैं। इससे सर्वत्र दूषित धूम परिव्याप्त होता है। यहाँ पटाखों के निषेध की आवश्यकता तो नहीं है, किन्तु सावधानी तो आवश्यक है। क्योंकि परिव्याप्त धूम से त्योहारों में व्यस्त लोग पीडित होते हैं। धूम से पीडित बहुत से लोग विभिन्न रोगों से ग्रस्त, त्रस्त (आतङ्कित), स्रस्त (शिथिल) होते हैं। पटाखों का निषेध तो असम्भव है। किन्तु संरक्षण अथवा धूम से पीडित होने के बाद उनके लक्षणों का निवारण तो अपेक्षित है। यद्यपि संहिताकाल में ऐसे पटाखा चलाने के त्योहार के आयोजन की व्यवस्था नहीं थी। फिर भी विभिन्न कारणों से परिव्याप्त धूम से पीडित लोगों की चिकित्सा तो थी ही। इस प्रकार की चिकित्सा को लेकर आचार्यों के द्वारा जिन चिकित्सा सिद्धान्तों का निर्देश किया गया, उन सिद्धान्तों का और उनके अनुवर्ती उपक्रमों और औषधयोगों का प्रयोग करना आवश्यक है। यहाँ संक्षेप में उनका निर्देश किया जाता है।

**पूर्वन्तु धूमोपहतस्य लक्षणानि प्रस्तूयन्ते। दूषितेन धूमेन श्वासकृच्छ्रः भवति, जनः क्षौति, कासग्रस्तश्च भवति। अस्य चक्षुषी दाहग्रस्ते भवतः प्रतिश्यायश्च जायते। कदाचिज्जनः तृष्णादाह-ज्वरयुतोऽपि भवति, श्रुतिश्चाप्युपहन्यतेऽस्य।**

पहले तो धूमोपहत के लक्षण प्रस्तुत किये जा रहे हैं। दूषित धूम से श्वासकृच्छ्रता होती है, व्यक्ति छींकता हैं, कासग्रस्त होता है। उसकी आँखें दाहग्रस्त होती हैं और प्रतिश्याय उत्पन्न होता है, कदाचित् व्यक्ति तृष्णा, दाह, ज्वर से ग्रहस्त होता है, उनकी सुनने की क्षमता भी नष्ट हो जाती है।

**आचार्यः सुश्रुतः धूमोपहतस्य चिकित्सामपि क्रमेण निर्दिशति। सामान्यतया धूमोपहननेन येषां येषां रोगाणां लक्षणानां समुत्पत्तिर्भवति तान्तानधिकृत्य चिकित्सापि तदनुसारिण्येव भवति। पुनरपि श्वासरोगमधिकृत्य या व्यवस्था आचार्येण विहिता तस्या अनुपालनं दीपावलि-समये विशेषेण करणीयम्। दीपावलिपर्वणि विशेषण सर्पिषः द्राक्षाणामिक्षुरसानां पयसः शार्करस्य वा प्रयोगः शनैः शनैः स्वल्पया मात्रया पुनः पुनरग्निं समीक्ष्य करणीयः। तेन धूमप्रभावस्य अपवारणं निवारणं च भवति। एतदतिरिक्तं मधुराम्ललवणकटुसम्मिश्रितस्य कवलस्य धारणं मुखे करणीयम्। एतदर्थं द्राक्षा-निम्बुस्वरस-सैन्धवलवण-आर्द्रक-मरिचानां सम्मिश्रणं कृत्वा कल्कः विधेयः। तस्य कल्कस्य मुखे कवलात्मकरूपेण धारणं करणीयम्। नासिकायां षड्-बिन्दुतैलस्य निपातनं करणीयम्। अक्ष्णोः प्रक्षालनञ्च शीतेन जलेन पुनः पुनः करणीयम्। व्योषादिवटीमेलादिवटीं वाऽऽचूषयेत्, मधुना सितोपलादिचूर्णस्य लेहनं कर्तव्यम्, हरिद्रा-खण्डस्य सेवनम् चिकित्सकस्य परामर्शेन करणीयम्, वासावलेहं वा लेहयेत्। अनेन धूमोपहननस्य अपवारणं भवति।**

आचार्य सुश्रुत ने धमोपहत व्यक्ति की चिकित्सा का भी क्रम से निर्देश किया है। सामान्यतया धूमोपहनन से जिन जिन रोगों की और लक्षणों की समुत्पत्ति होती है उन उन को लेकर चिकित्सा भी तदनुसार ही होती है। फिर भी श्वास रोग को लेकर जो व्यवस्था आचार्य द्वारा विहित है उसका अनुपालन दीपावली के समय विशेष रूप से करना चहिए। दीपावली पर्व पर विशेष रूप से घी, द्राक्षा, इक्षुरस, दूध और शर्बत का प्रयोग शनैः शनै स्वल्पमात्रा में पुनः पुनः अग्नि की समीक्षा करके करना चाहिए। इससे धूम के प्रभाव का अपवारण और निवारण होता है। इसके अतिरिक्त मधुर, अम्ल, लवण, कटु रस मिश्रित कवल का धारण मुख में करना चाहिए। इसके लिए द्राक्षा, निम्बुरस, सैन्धवलवण, आर्द्रक, मरिच का मिश्रण करके कल्क का सेवन करना चाहिए। उस कल्क को मुख में कवल के रूप में धारण करना चाहिए। नासिका में षड्-बिन्दुतैल का निपातन करना चाहिए। आँखों को प्रक्षालन शीतल जल से पुनः पुनः करना चाहिए। व्योषादिवटी या एलादिवटी का आचूषण करना चाहिए, मधु से सितोपलादि चूर्ण का लेहन करना चाहिए, हरिद्राखण्ड का सेवन चिकित्सक के परामर्श से करना चाहिए, वासावलेह का लेहन करना चाहिए। इससे धूमोपहनन का अपवारण होता है।

**४०, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

# Ekal Vidyalaya







**WHAT IS EKAL VIDYALAYA?**
Ekal Vidyalaya means One teacher One School Ekal Vidyalaya is a unique concept that aims to bring education to the doorstep of a village where children are offered five years of schooling and primary health care free of cost.

**SCHOOL STRUCTURE**
One school has 35 to 45 children of age group of 5 to 16. It is often conducted under the shade of big tree or hut.

**TEACHER**
Teacher from local villages are specially trained to become catalysts for change and for building hope for the entire village.

**THE CURRICULUM**
A Panel of Educationists has developed curricula, which is aligned with government prescribed texts and local culture. Emphasis is given on health, hygiene, character and ethical values.

# JANKALYAN PRATHISTHAN

Amrit Bhog Complex, Kalikasthan, Dili Bazar.
Post Box No. 12105, Kathmandu, Nepal
Phone : 00977 14443674, Fax: 009771 4444020

Contact in Europe
Mr. Bitthal Maheshwari
Post box No.122703, 55743 Idar-Oberstein Germany
Phone No.00491726699191, 00491726158359
E-Mail : bitthat.m@gmail.com / rcjain43@gtnail.coni

**Mr. Hasmukh Velji Bhai Shah**
19 Chellow Lane, Bedford BD9 6AX, West Yorkshire, (U.K)
Telephone : 00447771765200, 004417274820568
E-mail : akhandhind@gmail.com

**Contact in Middle-east**
Mr. Mahesh Devjibhai Sagar, Post Box No. 1428
Manama, Kingdom of Bahrain
Phone No.: 0097339658802, 00971506406697
E-mail : rndevji@batelco.com.bh

भारती के सभी
पाठकों को
दीपावली की हार्दिक
शुभकामनाऐं :-
रमेश मुलतानी
विनोद मुलतानी
0141-2564802
09829014802
09829014602

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2018-20

हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत्त एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक
पाञ्चजन्य

(English) Weekly
ORGANISER

हमारी विशेषताएं



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



You can subscribe Panchjanya/Organiser Weeklies online through our Websites: www.panchjanya.com, www.organiser.org

वार्षिक ग्राहक शुल्क
भारत में ₹ 700/- पाञ्चजन्य • ₹ 800/- ORGANISER (साधारण डाक द्वारा)
विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

प्रसार विभाग
भारत प्रकाशन (दिल्ली) लिमिटेड
2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली- 110055
फोन : 011-47642000,01,02, ई-मेल: circ@bpdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचारसंस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,